नं० १०३८ - घ

वैराग्यशतक सटीकम् (काव्यम्)

पत्राणि २८ (सम्पूर्णम्)

नं० १०३७ - घ

कर्त्ता भर्तृहरिः

लिपिक: जवाहिर गिरि:

संवत १८६२

2

चिन्मात्र

श्रीगणेशायनमः ॐनमोभगवतेवासुदेवाय श्लोक ॐदिक्कालाद्यनवछिन्नानंतचि
न्मात्रमूर्तये स्वानुभूत्यैकमानायनमःशांतायतेजसे १ टीका व्याख्या तस्मैशांतायते
जसेपरंब्रह्मणेनमः किंविशिष्टायशांतायतेजसेस्वानुभूत्यैकमानायस्वकीयायाः अनु
भूतेःअनुभवात् एकंमानंयस्यसः स्वानुभूत्यैकमानस्तस्मैस्वानुभवः पुनःकिंविशिष्टस्य
शांतायतेजसे दिक्कालाद्यनवछिन्नानंतचिन्मात्रमूर्तयेदिक् चकालश्चदिक्कालौदिक्का
लाभ्यामनवछिन्नाअज्ञाताअनंताचिन्मात्रस्यमूर्तियस्य सदिक्कालाद्यनवछिन्नानंतचि
न्मात्रमूर्तिः तस्मै १ श्लोक बोद्धारोमत्सरग्रस्ताःप्रभवःस्मयदूषिताः अज्ञानोपहताश्चा
न्येजीर्णमंगेसुभाषितं २ टीका अप्यगुणहीनतास्वरूपमाह बोद्धारोज्ञातारोमत्सरग्र
स्ताःविरोधव्याप्ताः प्रभावोनृपाःस्मयदूषिताःगर्वकलंकिताःचान्यदन्येअज्ञानोपहताः।
अंगेशरीरेसुभाषितंजीर्णंस्वदंतिहीनंएतेप्रकाराःमहिमानंनप्राप्नुवंति २ श्लोक नसं
सारोत्पन्नंचरितमनुपश्यामिकुशलं विपाकःपुण्यानांजनयतिभयंमेविमृशतः महद्भिः
पुण्यौघैश्चिरपरिगृहीताश्चविषयाः महांतोजायंतेव्यसनमिवदातुंविषयिणां ३ टीका सं
सारोत्पन्नंचरितंकुशलंनानुपश्यामि पुण्यानांविपाकःफलंविमृशतोमेमेभयंजनयति सं
संसारस्यानित्यतामाह २

भ॰टी॰
१

सारपरिभ्रमणत्वात् कथंचिमेषिचान्यत् महद्भिः पुण्यौघैः महांतः पंचेंद्रियगोचराविषयाः चिरपरिगृहीताः संतः विषयिणां प्राणिनां व्यसनं दातुमिव जायंते ३ श्लोक भ्रांतादेशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं त्यक्त्वा जातिकुलाभिमानमुचितं सेवाकृता निःफला भुक्तं मानवविवर्जितं परगृहे साशंकया काकवत् तृष्णे जंभणि पापकर्मनिरते नाद्यापि संतुष्यति ४ टीका अथ तृष्णाधिकारमाह हे तृष्णे पापकर्मनिरते जंभिणि सोत्लासे अद्यापि न संतुष्यसि न संतुष्टा भवसि तत्दोषानदेशांति हे तृष्णे अनेकदुर्गविषमं देशं भ्रांत्वा किंचित्फलं न प्राप्तं हे तृष्णे उचितं योग्यं जातिकुलाभिमानं त्यक्त्वा निःफला सेवा कृता परगृहे मानविवर्जितं साशंकया भुक्तं किंवत् काकवत् तृष्णे सर्वमेतत्त्वदं चेष्टितं ४ श्लोक उत्खातं निधिशंकया क्षितितलं ध्माता गिरेर्धातवो निस्तीर्णः सरितांपतीन् पतयो यत्नेन संतोषिताः मंत्राराधनतत्परेन मनसा नीता श्मशाने निशा लब्धः काणवराटकोऽपि न मया तृष्णेऽधुना मां त्यज ५ टीका पुनराह हे तृष्णे अधुनां मां त्यज कथं हे तृष्णे तव प्रभावात् निधिशंकया क्षितितलमुत्खातं कथं मया इह निधानं लभेयं इति वांछया हे तृष्णे तव प्रेरणया गिरेर्धातवो ध्माताः कदाचिदपि सोवर्णी खनिलभेत् यथा पालाभे सति हे तृष्णे सरितांप

१

श्लोक दीनादीनमुखैः सदैवशिशुकैराकृष्टजीर्णांबरा क्रोशद्भिः क्षुधितैर्नरैर्नविधुरा दृश्येत चेद्गेहिनी याच्ञाभंगभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ९ टीका अथान्यदाह को मनस्वी पुमान् कोभिमानी पुरुषः स्वदग्धजठरस्यार्थे स्वकीयदुःपूरोदराय इति वदेत् देहीति किं देहि कथं गद्गदगलत् त्रुट्यद्विलीनाक्षरं यथा भवति गद्गदं गलंति च त्रुट्यंति विलयं गतानि अक्षराणि यत्र तत् गद्गदगलत्त्रुट्यद्विलीनाक्षरं केन याच्ञाभंगभयेन याच्ञायाः भंगः याच्ञाभंगः तस्य भयं याच्ञाभंगभयं तेन याच्ञाभंगभयेन अन्यच्च चेत् यदि नरैर्मनुष्यैः गेहिनी गृहिणी सदैव सर्वदा क्षुधितैः शिशुकैः आकृष्टजीर्णांबरा सती सती विधुरा न दृश्येत व्याकुला न विलोक्येत नरैः किं विशिष्टैः शिशुकैः क्रोशद्भिः गालिं ददद्भिः रुदद्भिः पुनः किं विशिष्टैः शिशुकैः दीनादीनमुखैः दीनानि च आदीनानि च मुखानि येषां तानि दीनादीनमुखानि तैः दीना ९ श्लोक निवृत्ता भोगेच्छा पुरुषबहुमानो विगलिताः समानाः स्वर्याता सपदि सुहृदो जीवितसमाः शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने अहो धृष्टः कायस्तदपि मरणापायचकितः १० टीका अथान्यदाह अहो इति आश्चर्ये अयं कायः अयं देहः तदपि मरणापायचकितः तदपि किं निवृत्ता भोगेच्छा चान्यत्स

रूषबहुमानो विगलितः अन्यच्च समानः समानवयसः सुहृदो मित्राणि स्वर्याताः स्वर्लोकंप्रा
प्तः किंविशिष्टाः सुहृदः जीवितसमाः प्राणतुल्याः यदि चेत् शनैरुत्थानं अर्थादुपविशन
चयान्यत् नयने घनतिमिररुद्धे जाते तथाप्ययं कायः मरणाद्बिभेति मरणं नेच्छतीत्यर्थः।
किंविशिष्टः कायः धृष्टो निर्लज्जः १० श्लोक हिंसाशून्यमयत्नलभ्यमशनं धात्राम
रुत्कल्पितं व्यालानां पशवस्तृणांकुरभुजस्तुष्टाः स्थलीशायिनः संसारार्णवलंघन
क्षमधियां वृत्तिः कृता सा नृणां यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ११॥
टीका अथान्यदाह व्यालानां सर्प्पाणां धात्रा विधात्रा अशनं भोजनं मरुत् पवनः क
ल्पितं किंविशिष्टमशनं हिंसारहितं पुनः किंविशिष्टमशनं अयत्नलभ्यं सुलभं तथा
पशवः तृणांकुरभुजः बालतृणपल्लवभोजिनः सृष्टाः किंविशिष्टाः पशवः स्थली
शायिनः धात्रा विधात्रा नृणां मनुष्याणां वृत्तिः सा काचिदा निष्टा कृता यां वृत्तिं सततं
निरंतरमन्वेषयतां सर्वे गुणाः समाप्तिं यान्ति निष्ठां यान्ति नाशं निष्ठा निष्पत्ति नाशान्तात्
त्यम्बरः किंविशिष्टानां नृणां संसारार्णवलंघनक्षमधियां संसारसमुद्रतरणसमर्थ
बुद्धीनाम् ११ श्लोक नध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये स्वर्गद्वारकपा

रपाटनपटुर्धर्मोपिनोपार्जितः नारीपीनपयोधरोरुयुगलं स्वप्नेपिनालिंगितं मातुःकेव
लमेवयौवनवनछेदेकुठारावयं १२ टीका तदेवाह वयमेवनिश्चयेनकेवलंमातुः यौ
वनवनछेदेकुठाराःजाताःस्मइतिशेषः कथंयत् ईश्वरस्यपदं परमानंदस्वरूपं भुल्क
ध्यानं किमर्थंसंसारविछित्तयेसंसारनिस्तारायअन्यच्चधर्मोपिनोपार्जितः तथाचना
रीपीनपयोधरोरुयुगलं स्वप्नेपिनालिंगितंअंतःकरणात् मातुस्तारुण्यवनछेदे वयं
मुख्याकुठाराएव १२ श्लोक भोगानभुक्तावयमेवभुक्तास्तपोनतप्तंवयमेवतप्ताः का
लोनयातोवयमेवयाताःतृष्णानजीर्णावयमेवजीर्णाः १३ टीका अत्यच्चाह अस्माभिः
भोगानभुक्ताः वयमेवभुक्ताः तपोनतप्तंतदावयमेवतप्ताः नारीकैः संतापिताः कालो
नयातःवयमेवयाताःप्रयाणमार्गेयाताः तृष्णातुअस्माकंकदाचिदपिनजीर्णावयमेवजीर्णाः
१३ श्लोक क्षांतंनक्षमयागृहोचितसुखंत्यक्तंनसंतोषितः सोढादुःसहशीतवाततपन
क्लेशाःनतप्तंतपः ध्यातंवित्तमहर्निशंनियमितःप्राणैर्नशंभोःपदं तत्तत्कर्मकृतंतदेव
मुनिभिस्तैस्तैःफलैर्वंचिताः १४ टीका अथात्मनोनिरामसदमाह अस्माभिःतदेवतत्त
त्कर्मकृतंतैस्तैःफलैःमुनिभिर्वंचिताः स्मयत् यस्मात्कारणात् क्षमयानक्षांतंअन्यच्चगृ
हे तत्कर्मकृतंयेनकर्मणातैस्तैःफलैर्वंचिताः १४ ॥

नच्यातं

णी

श्लोक वलीभिर्मुखमाक्रांतं पलितैः शिरः अंकितं गात्राणि शिथिलायंते तृष्णैका तरुणायते।
१५ टीका अथान्यदाह मुखं वलीभिराक्रांतं पलितैः शिरः अंकितं गात्राणि शिथिलायंते।
एका तृष्णाशाया तरुणायते १५ श्लोक येनैवांबरखंडेन संवीतो निशि चंद्रमाः तेनै
व च दिवा भानुरहो दौर्गत्यमेतयोः १६ टीका अथानित्यतामाह निशि रात्रौ येनैव अंबरखंडे
न चंद्रमाः संवीतो गतः चान्यत् तेनैव अंबरखंडेन दिवा वासरे भानुः सूर्यः संवीतो अहो दु
ति खेद एतयोः सूर्यचंद्रमसोः दौर्गत्यं विलोकयतो १६ श्लोक अवश्यं यातारश्चिरतरमु
षित्वापि विषयाः वियोगे को भेदः त्यजति न जनो यत्स्वयममून् व्रजंत्याः स्वातंत्र्यादतुल
परितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनंतं विदध्यति १७ टीका अथ विषयवि

रक्तमाह एते विषया पंचांगलक्षणा अवश्यं निश्चितं यातारः गमिष्यंति किं कृत्वा चिरतरं
चिरकालमुषित्वापि स्थित्वापि जनो लोकः यत् अमून् विषयान् स्वयं न त्यजति तद्वियो
गे को भेदः किमाधिक्यं एते विषयाः स्वातंत्र्यात् स्वाधीनात् आत्मवशात् व्रजंतः गच्छंतः मन
सः आत्मनः अतुलपरितापाय भवति प्रबलदुःखाय स्युः हि निश्चितमेते स्वयं त्यक्ताः संतः
अनंत शमसुखमुपशमं विदधति अतः कारणात् एते विषयाः स्वयं मोक्षमोत्पादका

॥ ॥ ॥ ॥ इत्यर्थः १७ ॥ ॥ ॥ स्वक्ताः ॥ ॥

श्लोक विवेकव्याकोशे विदधति शमे शाम्यति तृषा परिष्वंगे तुंगे प्रसरति तरां सा परिणतिः
जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणः कृपापात्रं यस्यां भवति मरुतामप्यधिपतिः १८
टीका अथ तस्माधिकमाह तृषा तस्मात् शमे उपशमे सति शाम्यति उपशमं गच्छति क्व स
ति विवेकव्याकोशे विकाशे विदधति सति सा परिणतिः तस्याः परिणामात् तुंगे परिष्वंगे आ
श्लेषे सति तरां प्रसरति सुष्ठु अयमर्थः अपरापि या विलासिनी भवति तुंगे परिष्वंगे सति तरां प्र
सरति न तु व्याप्तिं भजते लब्धावकाशत्वात् तथा सा तस्यामपि मरुतां देवानामप्यधिपतिः इं
द्रः यस्यां तस्यां कृपापात्रं भवति छेतुमशक्तो भवतीत्यर्थः मनुजानां तु का कथा किं विशि
ष्टः मरुताधिपतिः जराजीर्णैश्वर्यग्रसनगहनाक्षेपकृपणः जरसा जीर्णमैश्वर्यं जराजीर्णै
श्वर्यं तस्य ग्रसनेन यद्गहनं जराजीर्णैश्वर्यग्रसनगहनं तस्य आक्षेपे कृपणः विध्वंसे असम
र्थः अतः कारणात् तस्मात् गरीयसी १८ श्लोक कृशः काणः खंजः श्रवणरहितः पुच्छवि
कलः व्रणी पूतिक्लिन्नः कृमिकुलशतैरावृततनुः क्षुधाक्षामो जीर्णः पिठरककपाला
र्पितगलः शुनीमन्वेति श्वा हतमपि च हंत्येव मदनः १९ टीका मदनवर्णितामाह श्वा शु
नीमन्वेति किं विशिष्टः श्वा कृशो दुर्बलः काणः एकदृक् खंजो भग्नपादः श्रवणरहितः छिन्नौ

वै॰ टी॰
५

कर्णः पुच्छविकलो लांगूलरहितः व्रणी अपि कंठव्याप्तः स्फोटकव्याप्तः पूतिक्लिन्नः पिल्लुभिरंचितः पुन
रपि किं विशिष्टः श्वा क्रमिकुलशतैराचिततनुः पुनरपि किं विशिष्टः श्वा क्षुधाक्षामः पुनरपि
किं विशिष्टः श्वा जीर्णः जराक्रांतः पुनरपि किं श्वा पिठरकपालार्पितगलः करंकमुंडसमर्पित
मुखः एवंविधोऽपि मन्तुकामोपि श्वा सुनीमन्वेति अनुसरति तदा मदनः एव निर्भयेन हतमपि हं
ति १९ श्लोक भिक्षाशनं तदपि नीरसमेकवारं शय्या च भूः परिजनो निजदेहमात्रं वस्त्रं च
जीर्णशतखंडमयी च कंथा हाहा तथापि विषया न परित्यजंति २० टीका पुनराह हाहा इति
खेदे विषयाः तथापि न परित्यजंति चेटकं न मुंचति तथापि किं भिक्षाशनं तदपि [illegible]रसं रस
हितं तदप्यशनमेकवारं चान्यत् शय्या भूः अन्यश्च परिजनो निजदेहमात्रं चान्यत् [illegible] शतखं
डमयी कंथा तथापि विषयाः दुराशया विगोपयंति प्राणिनां २० श्लोक स्तनौ मांसग्रंथी कन
ककलशावित्युपमितौ मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं स्रवन्मूत्रक्लिन्नं करिवर
करस्पर्द्धि जघनं महो निंद्यं रूपं कविजनविशेषैर्गुरुकृतम् २१ टीका अथ रूपतिरस्कारमा
ह अहो इति दुःखे रूपं निंद्यं कविजनविशेषैः गुरुकृतं कथं निंद्यं स्तनौ मांसग्रंथी परमित्युपमि
तौ उपमानितौ इतीति किं कनककलशौ चान्यत् मुखं श्लेष्मागारं तदपि च शशांकेन तुलितं चंद्र

तो॰ सं॰
५

श्लोकः अजानन्माहात्म्यंपततिशलभस्तीव्रदहने समीनोप्यज्ञानाद्बडिशयुतमश्नातिपिशितं।
ज विजानंतोप्येतेवयमिहविपज्जालजटिलान्नमुंचामःकामानहहगहनोमोहमहिमा २२ टीका
तदेवाह अहहइति खेदेमोहनमहिमागहनोवर्त्ततेयतःशलभः पतंगदीपशिखायांपततिशल
भः किं कुर्वन् माहात्म्यमजानन् अन्यच्च समीनोमत्स्यः अज्ञानात् बडिशयुतंपिशितंमांसम।
श्नातिभक्षति इहअस्मिन्संसारेएतेवयंविजानंतोपिकामानमुंचामः किंविशिष्टान्कामान्
विपज्जालजटिलान् विपदांजालः विपज्जालः तेनजटिताः विपज्जालजटिलाः तान् विपज्जा
लजटिलान् अतःएवमोहमहिमागहनोगरीयान् २२ श्लोकः विशालमशनायस्वादुपाना फल
यतोयं शयनमवनिपृष्ठंवल्कलेवाससेच नवधनमधुपानभ्रांतसर्वेंद्रियाणा मविनयम
नुमंतुंनोत्सहेदुर्जनानाम् २३ टीका अथदुर्जनमुद्दिश्याह वयंदुर्जनानांपिसुनानामवि
नयमनुमंतुंअंगीकर्त्तुंनोत्सहनोत्साहंकुर्महे किंविशिष्टानांदुर्जनानां नवधनमधुपानभ्रांत
सर्वेंद्रियाणां नवनवीनोपार्जितंधनंनवधनंतदेवमधुपानंमदिरापानंतेनमधुपानेनभ्रां।
तानिसर्वाणिइंद्रियाणि येषांतेनवधनमधुपानभ्रांतसर्वेंद्रियास्तेषां अलमत्यर्थमशना।
नायभोजनायफलंविशालंकमलिनीकंदंवरंचान्यत् स्वादुपानायतोयंवरंचान्यत् अवनिपृष्ठंशयनं
वरंवल्कलेवाससेवल्कलचीरंवरम् २३ ॥

वै.टी.
१६

श्लोक विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितंपुराविधृतमपरैर्दत्तंचान्यैर्विजित्यतृणंयथा इ
हहिभुवनान्यन्येधीराश्चतुर्दशभुंजतेकतिपयपुरस्वाम्येपुंसांकएषमदज्वरः २४ टी
का अथमानिनामुद्दिश्याह पुंसांपुरुषाणांक एषमदज्वरः क्वसतिकतिपयपुरस्वाम्ये
सति अन्यैःकैश्चित्पुरापूर्वंजगज्जनितंजगत्सृष्टंकिंविशिष्टैःधन्यैःविपुलहृदयैःव
हत्तेतैर्भिः अपरैःकैश्चिदपिविधृतंनिजभुजाभ्यांधारितमन्यैःकैश्चिदपिपुरुषैःचान्य
दत्तंकिंकृत्वाविजित्य यथाशब्दोइवार्थेवर्ततेजगत्तृणमिव यथातृणमनायासेनदीयते त
थाजगद्विजित्य दत्तंहि निश्चितमिह अस्मिन्लोके अन्यधीराः चतुर्दशभुवनानिभुंजतेल
दास्वल्पस्वामिकोयंगर्वः २४ श्लोक त्वंराजावयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वंविभवैर्यशांसिकवयोदिक्षुप्रतन्वंतिनः इत्थंमानदनातिदूरमुभयोरप्यावयो
रंतरं यद्यस्मासुपराङ्मुखोवयमपिएकांततोनिस्पृहाः २५ टीका अथनिःस्पृहाणा
मधिकारमाह हे नरेंद्रत्वंराजावर्त्तसेवयमपिउपासितगुरुप्रज्ञाभिमानोन्नताः वर्त्ताम
हे हेराजेंद्रत्वंविभवैःख्यातःनोस्माकंयशांसिमहत्वानिकवयःकवीश्वराःदिक्षुप्रत
न्वंतिदिशासुविस्तारयंति हे मानद मानंददातिमानदः वादेअवखंडेनसंख्यक्षरान्ना
वर्त्तामहे त्वय्यनादराः त्वयिविषयेअनादराः २५॥

श्लोक अभुक्तायायस्यांक्षणमपिनयातेनपश्चात्तैः भुवस्तस्यांलाभेकइवबहुमानाःक्षितिभु
जां तदंशस्याप्यंशेनतदवयवलेशेपिपतयो विषादैकर्त्तव्यैर्दधतिजडाः प्रत्यन्तमुदम् २६ टी वि
का अथराज्ञांगर्वेनिरस्कारोदिशन्नाह जडाः मूर्खाः विषादैकर्त्तव्ये प्रत्यन्तसन्मुखंमुदंविदधति
कथंक्षितिभुजां राज्ञांयस्याः भुवः पृथिव्याः लाभेकइवबहुमानः यस्यांपृथिव्यां अभुक्तायांस
त्यांनपश्चात्तैः नरेंद्रसहस्रैः क्षणमपिनयातं नयातेनगतंकिंविजडः तदंशस्यांशेनतस्याःपृथि
व्याः विभागस्यापिविभागेनतदवयवलेशेनतस्य अंशस्यापिलेशेपिपतयः स्वामिनः २६ ॥
श्लोक मत्सिंडोजलरेखयावलयितः सर्वोप्ययंनन्वणु स्वंशीकृत्यसएवसंयुगशतैराज्ञांग
णैर्भुज्यते तेदद्युर्ददतेथवानकिमपिक्षुद्राः दरिद्राभृशं धिक्धिक्तान्पुरुषाधमान्धन
कणंवांछतितेभ्योपिये २७ टीका अथपुनराह तान्पुरुषाधमान् धिक्धिक् येअधुना
तेभ्योपिधनकणंवांछतिकथमयंमत्सिंडः पृथ्वीवलयः अयंसर्वोपिजलरेखयावलयि
तः सन्ननुअणुः स्वल्पप्रमाणः पुनःसएवमत्सिंडः राज्ञांगणैर्भुज्यते किंरूपासंयुग
शतैः संग्रामागणशतैः अंशीकृत्यतेक्षुद्राराजानः भृशामुत्सर्थे किमपिदद्युः अथवानद
दतेतानेवपुरुषाधमान् धिक्धिक् येतेभ्योपिवांछांकुर्वंति २७ ॥ छ ॥ छ ॥ छ ॥

वै॰टी॰
७

श्लोक न नृत्ता न विरताः न गायनाः न परद्रोहनिबद्धबुद्धयः नृपसद्मनि नाम के वयं कुचभारानमिता
न योषिताः २८ टीका नाम इति संबंधने नृपसद्मनि वयं के वयं तराः न नृत्यकृतः न विरताः उती।
र्णा न न गायनाः न परद्रोहनिबद्धबुद्धयः एपरद्रोहेनिबद्धाः बुद्धयो येषां ते परद्रोहनिबद्धबुद्धयः
वयं योषितो पि न किं विशिष्टाः योषितः कुचभारानमिताः कुचभारेण आसंमनाद्भावेन नमिताः
कुचभारनमिताः एवंविधापि २८ श्लोक पुरा विद्वत्तासीदुपशमवतां क्लेशहतये गता का
लेनासौ विषयसुखसिस्थै विषयिणां इदानीं संप्रेक्ष्य क्षितितलभुजः शास्त्रविमुखा नहो
कष्टं सापि प्रतिदिनमधोधः प्रविशति २९ टीका पुनराह पुरा पूर्वं उपशमवतां विद्वत्ता वै
दुष्यलं क्लेशहतये संसारनिवारणाय आसीत् असौ विद्वत्ता कालेन गच्छता विषयिणां पुरुषा
णां विषयसुखसिस्थै गता अहो इति खेदे कष्टं विलोक्यतां इदानीं सापि विद्वत्ता प्रतिदिनं अ
हरहः प्रतिभ्रष्टो ऽधः प्रविशति किं कृत्वा शास्त्रविमुखान् क्षितितलभुजः प्रेक्ष्य निरीक्ष्य २९
श्लोक सजातः कोप्यासीन्मदनरिपुणा मूर्ध्नि धवलं कपालं यस्योच्चैर्विनिहितमलंकारवि
धये नृभिः प्राणत्राणप्रणयमतिभिः कैश्चिदधुना नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः
३० टीका साहंकारपुरुषोदिश्यहे को पि पुरुषः आसीत् यस्य पुरुषस्य कपालमुच्चैर्यथा भव
नस्य त्राणे प्राणत्राणं प्राणत्राणे प्रवणा मतिर्येषां ते प्राणत्राणप्रणयमतयस्तैः ३०॥

श्लोक अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे समर्थाः भवामः चान्यत् त्वं यावदित्थं भरस्त्वं वाग्मि
दर्पज्वरमनुविधावक्षयं पाठवंतः सेवंते त्वां धनाढ्या मतिमलहतये मामपि श्रोतुकामाः मामप्या
स्थानमेतत् त्वयि मम सुतरामेष राजन्गतोसि ३१ टीका पुनस्तदेवाह हे राजन् त्वं समर्थानामीशिषे
समर्थो भवसि चान्यत् वयमपि गिरां वाणीनामीश्महे समर्थाः भवामः चान्यत् त्वं यावदित्थं अ
मुना प्रकारेण भरः नोस्माकं वाग्मि दर्प्पज्वरमनुविधो अक्षयं निश्चलं पाटवं वर्त्तते हे राजन् त्वां ध
नाढ्याः सेवंते मामपि श्रोतुकामाः श्रोतारः सेवंति किमर्थं मतिमलहतये बुद्धिकालुष्यस्फोटना
य हे राजन्ममापि त्वयि विषये एतदास्थानं एषः त्वं सुतराम तिशयेन मां प्रतिगतोसि प्राप्तोसि एता
वता तव मम च किमप्यंतरं नास्ति ३१ श्लोक यदा किंचिज्ज्ञोहं द्विपइव मदांधः समभवं तदा सर्वज्ञो

किंचित् स्मीत्यभवदवलिप्तं मम मनः यदा किंचिन्नू बुधजनसकाशादवगतं तदा मूर्खोस्मीति ज्वरइ
व मदो मे व्यपगतः ३२ टीका आत्मनो गुणागुणवचनमाह अहं यदा यस्मिन् प्रस्तावे मदांधः
समभवं किंचिज्ज्ञः अहं किंचिज्ज्ञः किंचित्जानातीति किंचिज्ज्ञः यत्तदोर्नित्यसंबंधः तदा मम
मनः इति अवलिप्तं अवभयत् इतीति किं अहं सर्वज्ञोस्मि यदा यस्मिन् प्रस्तावे बुधजनसकाशा
त् पंडितवर्गसमीपात् अवगतं ज्ञातं तदा इति अमुना प्रकारेण मम मम मदो व्यपगतो दूरीभूतः इती
ति किं अहं मूर्खोस्मि मदक इव ज्वर इव यथा कस्यापि ज्वरो याति तथा मम मम अहंकारो यातः ३२॥ ॥

किंचित्

वै॰टी॰
८
8

श्लोक अतिक्रांतः कालो लटभललनाभोगसुभगो भ्रमंतः श्रांतास्मः सुचिरमिहसंसारसरणिम्।
इदानीं स्वःसिंधोः तटभुवि समाक्रंदनगिरः सुतारैः फूत्कारैः शिवशिवशिवेति प्रतनुमः ३३ टी
का अथ निर्ममतास्वरूपमाह हे बाले लटभललनाभोगसुभगः कालो अतिक्रांतः अतिचक्रामः
लटभा सलावण्या या ललनास्तासां भोगमनोज्ञः लटभललनाभोगः इह अस्मिन् संसारेम
त्यैलोके संसारे मरणिं भ्रमंतः श्रांताः स्म इदानीं स्वःसिंधोः गंगायाः तटभुवि कवस्थलीभु शि
वशिवशिवेति प्रतनुमः किंविशिष्टाः वयं फूत्कारैः सुतारैः समाक्रंदनगिरः हे बाले त्वं कासि।
तव सन्मुखं न विलोकयामः ३३ श्लोक मानेम्लायिनि खंडिते च वसुनि व्यर्थे प्रयातेर्थिनि
क्षीणे बंधुजने गते परिजने नष्टे शनैर्यौवने युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः
पूतग्रावगिरींद्रकंदरदरीकुंजे निवासः क्वचित् ३४ टीका अन्यदाह सुधियां पुरुषाणां के
वलमेतदेव युक्तं यज्जह्नुकन्यापयः पूतग्रावगिरींद्रकंदरदरीकुंजे क्वचित् निवासः कोर्थः।
जन्हुकन्यायाः गंगायाः पयसा पूतः पवित्रा ये ग्रावाः तेषां यो सौ गिरींद्रः पर्वतः तस्य कंदरस्य
विवरस्य दरी गुफा तस्या निकुंजः जन्हुकन्यापयः पूतग्रावगिरींद्रकंदरदरीकुंजः तस्मिन्
तत्र निवासो वरं क्व सति माने म्लायिनि सति चान्यत् वसुनि खंडिते सति चान्यदर्थिनि याच
के व्यर्थे प्रयाते सति चान्यत् क्षीणे बंधुजने सति चान्यत् परिजने गते सति चान्यत् शनैः यौवनेन
ष्टे सति तदा वनवास एव रुचिरः ३४ ॥

यु

८

श्लोक परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा प्रसादं किन्नेतं विशसि हृदय क्लेशकलिलं ॥
प्रसन्ने त्वय्यंतः स्वयमुदितचिंतामणिगुणे विमुक्तः संकल्पः किमभिलषितं पुष्यति नते ३५ टी
का अन्यदाह हा इति खेदे त्वं हृदय बहुधा प्रसादं किं नेतुं गृहीतुं विशसि किं कृत्य परेषामपरेषां चे
तांसि प्रतिदिवसं दिवसं प्रति आराध्य किंविशिष्टं प्रसादं क्लेशकलिलं कष्टमलिनं हे हृदय त्वा
यि अंतर्मध्ये प्रसन्ने सति अभिलषितं वांछितं ते तव न पुष्यति किंविशिष्टे त्वयि स्वयमुदितचिं
तामणिगुणे किंविशिष्टः त्वं विमुक्तसंकल्पः ३५ श्लोक अनावर्त्ती कालो व्रजति स वृथा
तैन्न गणितं दशास्तास्ताः सोढा व्यसनशतसंपातविधुराः किं यद्वा चक्षामः किमिव वत नात्म
न्यपकृतं वयो यावत्तावत्पुनरपि तदेव व्यवसितं ३६ टीका अथान्यदाह सकालो व्रजति अ
स्माभिः न तत गणितं किंविशिष्टः कालः अनावर्त्ती अपुनरागामी न पुनः आगमोस्यास्तीति असा
वपुनरागामी तदस्यास्तीति यस्त्यद्यः अस्माभिस्तास्ताः दशाः सोढाः तत्किं यद्वा आचक्षामः किं
विशिष्टाः दशाः व्यसनशतसंपातविधुराः व्यसनानां कष्टानां शतं व्यसनशतं तस्य संपातेन
विधुराः व्यसनशतसंपातविधुराः वत इति खेदे अस्माभिरात्मनि किमिव न अपकृतं विरूपं न
कृतं यावद्वयं एतावत्पुनरपि तदेव व्यवसितं उद्यमितं नै कर्मणाः दुःखितैर्भूयते ३६ ॥ ९ ॥

वै·टी·
९
9

श्लोक नभिक्षादुःप्रापापथिपथिमठारामसरितः फलैःसंपूर्णाभूर्विटपिमृगचर्म्मापिवसनं स
खेवादुःखेवासद्दशापरिपाकःखलुतदा त्रिनेत्रंकस्यकाञ्चनलवमदांधंप्रणमति ३७ टीका पुन
रप्यभिमानितामाह कोभिमानीपुमान्धनलवमदांधंप्रणमति किंकृत्वा त्रिनेत्रंमहेशंत्यक्त्वातदा
इतिकथंभिक्षादुःप्रापानयथिरमठारामसरितःभूःपृथ्वीफलैःसंपूर्णाअपिपुनः विटपिमृग
चर्मैवसनंविटपिभूर्जत्वकूमृगचर्मेणीवसनंखुखेवादुःखेवासदृशापरिपाकःसदृकूकर्मणःफ
लंखलुनिश्चितंतदाधनलवमदांधंकःप्रणमतिः ३७ श्लोक स्थितिःपुण्यारण्येसहपरिच
योहंतहरिणैः फलैर्मेध्यावृत्तिःप्रतिनदीचतल्पानिदृषदः इतीयंसामग्रीभवतिहरिभक्तिस्पृह
यतां वनंवागेहंवासदृशामुपशांतैकमनसाम् ३८ टीका अथान्याह उपशांतैकमनसामुप
शांतमेकंमनोयेषांतेउपशांतैकमनसः तेषांयतीनांवनंवागेहंवासदृशंइति अमुनाप्रकारेण
इयंसामग्रीहरभक्तिस्पृहयतांभवति इतीति किंपुण्येपवित्रेअरण्येस्थितिः पुनःइतीति किंहं
तइत्यागमेहरिणैःसहपरिचयःचान्यत्फलैर्मेध्यापवित्रावृत्तिरित्यर्थः चान्यत्प्रतिनदिनदीरप्र
तिदृषदःतल्पानि ३८ श्लोक अमीषांप्राणानांतुलितविसिनीपत्रपयसां कृतेकिंनास्माभि
र्विगलितविवेकैर्व्यवसितं यदाढ्यानामग्रेद्रविणमदनिःसंज्ञमनसां कृतंवीतव्रीडैर्निजगुणक
थापातकमपि ३९ ॥

९

टीका अथान्वयदाह अस्माभिरमीषांप्राणानांकिंभूतानांप्राणानांतुलितविशिनीपत्रपयसांतु
लितंविशिनीपत्राणांकमलिनीदलानांपयोयैस्तेतेषांकृतेकिंनव्यवसितमुपघमितंकिंविशिष्टैः
अस्माभिःविगलितविवेकैःविगलितोविवेकोयेषांतेविगलितविवेकास्तैःविवेकरहितैरित्यर्थः
यत् आध्यानामग्रेधनवतांपुरःवीतव्रीडैःगतलज्जैरस्माभिःनिजगुणकथापातकमपिकृतंनि।
जगुणानांकथानिजगुणकथातेषांपातकंनिजगुणकथापातकंकिंविशिष्टानामाध्यानांद्रवि
णमदनिःसंज्ञमनसांकोर्थःद्रविणमदेनधनमदेननिःसंज्ञंमनोयेषांतेद्रविणमदनिःसंज्ञम
नसस्तेषांधनमदअचेतनानांइत्यर्थः ३९ श्लोक भ्रातःकष्टमहोमहान्सनृपतिसामंतचक्रं
चतत् पार्श्वेतस्यचसापिराजपरिषत्ताश्चंद्रबिंबाननाः उद्रिक्तःसचराजपुत्रनिवहस्तेवंदि
नस्ताःकथा सर्वंयस्यवशादगात्स्मृतिपदंकालायतस्मैनमः ४० टीका अथान्वयदाह तस्मै।
कालायनमः अहोइतिआश्चर्येहेभ्रातःकष्टंविलोक्यतां किंकष्टंसएवमहान्नृपतिः चान्यतत्
सामंतचक्रंचान्यत् तस्यपार्श्वेसापिराजपरिषत् सापिराजसभाचान्यत् ताश्चंद्रबिंबाननाः।
नार्यः चान्यत् राजपुत्रनिवहः नृपकुमारसमूहः किंविशिष्टःराजपुत्रनिवहःउद्रिक्तःसदर्पः
चान्यत् तेवंदिनःतेभट्टाः चान्यत्ताःकथाःयस्यवशात् एतत्सर्वंपूर्वोक्तंस्मृतिपदमगात् कथा
शेषंजगामकालायतस्मैनमोयतःकालेनक्षीयतेसर्वम् ४०॥ छ ॥

श्लोक वयंयेभ्योजाताश्चिरपरिगताएवखलुते समंयैः संवृद्धास्मृतिविषयतांतेपिगमिताः इदानी मेतेस्मः प्रतिदिवसमासन्नपतना गतास्तुल्यावस्थांसिकतिलनदीतीरतरुभिः ४१ टीका पुनः कालोदिश्याह वयंयेभ्योसमानवयोभ्यः संजाताः खलुनिश्चितंतेचिरपरिगताएवंवयंयैः समं संवृद्धास्तेपिस्मृतिविषयतांगमिताः स्मृतेर्विषयतास्मृति विषयतानाःस्मारिताः संतःचेतोगो चरमायांतीत्यर्थः इदानीमेतेवयंस्मःसावशेषाः किंविशिष्टाः वयंसिकितिलनदीतीरस्तरुभि स्तुल्यावस्थांगताः सिकतिलाबालुकाधिकानदीसिकतिलनदीस्तस्यास्तीरतरवैस्तैः एतावता सिकतिलनदीतीरतरवः पतनशीलाभवंतीत्यर्थः सकुमारभूमित्वात् यादृशास्तेतरवः तादृशअ वस्थांवयंप्राप्तास्मः कस्मात्प्रतिदिवसंदिवसआसन्नपतनात् आसन्नकालमरणात् एता वतासंसारस्याऽवस्थाईदृशीवर्तते ४१ श्लोक यत्रानेकः क्वचिदपिगृहेतत्रतिष्ठत्यथैको यत्राप्येकस्तदनुबहवस्तत्रचांतेनचैकः इत्थंचेमौरजनिदिवसौदोलयन्द्वाविवाक्षौ कालः काल्यासहबहुकलः क्रीडतिप्राणिसारैः ४२ टीका अथान्यदाह कालःमृत्युः काल्यासह कालरात्र्यासहप्राणिसारैः सत्वकाष्ठमुख्यैः क्रीडतिरमतिकिंविशिष्टः कालः बहुकलःबह्वी कलायस्यासौबहुकलः किंकुर्वन् इमौद्वौरजनिदिवसौइत्थममुनाप्रकारेणअक्षाविवपाशा काविवदोलयन्प्रक्षिपन्प्रेरयन्मुक्तोयमर्थः अन्योपियोद्युतरूतं क्रीडांकुरुते तस्याक्षौपाशको इत्थंस्वभावतः ४२॥

श्लोक तपस्यंतः संतः किमधिनिवसामः सुरनदीं गुणोदारान्दारानुतपरिचरामः सविनयं पिबा
मः शास्त्रौघान्नुतविविधकाव्यामृतरसान् न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ५२ ॥
टीका अथान्यदाह जने लोके न विद्मः किं कुर्मः किमिति संशये सुरनदीं गंगां निवसामः अथ किं
कुर्मः किंविशिष्टाः वयं तपस्यंतः तपः कुर्वंतः संतः उत अथवा दारान् कलत्रान् परिचरामः
परिचर्यां कुर्मः किंविशिष्टान्दारान्गुणोदारान् गुणोत्कटान् उत अथवा शास्त्रौघान् पिबा
मः स्मरामः किंविशिष्टान् शास्त्रौघान् उत विविधकाव्यामृतरसान् उतः स्वतः विविधकाव्या
नाममृतरसो येषु ते उत विविधकाव्यामृतरसाः तान् चेतस्यास्माकं संशयो वरिवर्त्ति एते
षु पदार्थेषु किं कुर्मः यो गुणाधिकस्तं सेवयामः ५३ श्लोक गंगातीरे हिमगिरिशिलाबद्ध
पद्मासनस्य ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य किं तैर्भाव्यं मम सुदिवसैर्यत्र ते
निर्विशंकाः संप्राप्स्यंते जरठहरिणाः शृंगकंडूविनोदं ५४ टीका अथान्यदाह किमिति सं
भावनायां मम तैः सुदिवसैर्भाव्यं यत्र जरठहरिणाः प्रौढमृगाः निर्विशंकाः संतः निर्गताः ॥
विशेषेण शंका येषां ते शृंगकंडूविनोदं विषाणघर्षणलीलां संप्राप्स्यंते किंविशिष्टस्य मम
गंगातीरे हिमगिरिशिलाबद्धपद्मासनस्य हिमगिरिशिलायां बद्धं पद्मासनं येन स हिमगिरिशिला
मेलभावेन सुखमाध्यासितः ५४ ॥

श्लोक स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने सुखासीनाः शान्तध्वनिषु रजनीषु द्युसरितः
भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्तवचसा कदा स्यामानन्दोद्गतबहुलबाष्पाप्लुतदृशः ४५ टीका
अन्यदाह वयं शिव शिव शिवेत्यार्तवचसा कदा स्याम: किं विशिष्टाः वयं भवाभोगोद्विग्नाः भवस्य सं
सारस्य आभोगः तत्र उद्विग्नाः शिव शिव शिवेत्यार्तवचसा आनंदोद्गतबहुलबाष्पप्लुतदृशः आ
नंदेन उद्गतानि बहुलानि यानि बाष्पाणि तैः प्लुते दृशौ येषां ते आनंदोद्गतबहुलबाष्पप्लुतदृशः
पुनः किं वयं द्युसरितः गंगायाः क्वापि निर्जने पुलिने सुखासीनाः कासु रजनीषु किं रजनीषु शां
तध्वनिषु उपशांतशब्दासु एवंविधाः वासराः संभोगहीनानां भवेयुः ४५ श्लोक महादेवो देवः
सरिदपि च सैवामरसरित् गुहा एवागारं वसनमपि ता एव हरितः सुहृद्वा कालोऽयं व्रतमिदमदै
न्यव्रतमिदं कियद्वा वक्ष्यामो वटविटप एवास्तु पिता ४६ टीका अथान्यदाह देवो महादेवो मा
न्यः सरिदपि नद्यपि सैव अमरसरित् सुरनदी आगारं गृहं गुहा एव वसनमपि वस्त्रमपि हरितः
दिशः वाथवा सुहृत् मित्रं अयं कालः व्रतमिदमदैन्यव्रतं इदं कियत् वक्ष्यामः दयिता कलत्रं व
टविटप एव अस्तु ४६ श्लोक शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं गिरीन्द्रादुत्तुंगा

दवनिमवनेश्चापि जलधिं अधोऽधो गंगेयं पदमुपगता स्तोकमथवा विवेकभ्रष्टानां भवति
विनिपातः शतमुखः ४७॥

टीका अथान्यदाह आर्यै महेशंशिर: स्वर्गाद्भ: पशुपतिशिरस्त: महेश्वरमस्तकात् क्षितिधरं
उत्तुंगात् गिरीन्द्रात् अवनिं अधो जानीहि अवनेभ्यापि जलधिं समुद्रं अधो जानीहि स्तोकं गंगे
यमधोध: उपगता अथवा विवेकभ्रष्टानां प्राणिनां विनिपात: शतमुखानि यस्य स: शतमु
खो भवति ४७ श्लोक आशानामनदी मनोरथजला तृष्णातरंगाकुला रागग्राहवती वित
र्कविहगा धैर्यद्रुमध्वंसिनी मोहावर्तसुदुस्तरातिगहना प्रोत्तुंगचिंतातटी तस्या: पारगता विशु
द्धमनसो नंदंतयोगीश्वरा: ४८ टीका अथान्यदाह नाम इति संबोधने आशानदी किं आशा
नदी मनोरथजला मनोरथा एव जलानि यस्यां सा पुन: किं विशिष्टा: आशानदी तृष्णातरंगा
कुला अन्यापि या नदी भवति सा तरंगाकुला भवति इदं नदी तृष्णातरंगाकुला पुन: किं आशा
नदी रागग्राहयुक्ता युक्तं अन्यापि नदी जलचरजीववती भवति पुनरपि किं आशानदी मोहा
वर्त्तसुदुस्तरा मोहस्य आवर्त्त: तेन सुदुस्तरा मोहावर्त्तसुदुस्तरा अन्यापि नदी आवर्त्तैः सुदुस्तरा
मोहस्य आवर्त्त: तेन सुदुस्तरा मोहावर्त्तसुदुस्तरा अन्यापि नदी सुदुस्तर: भवति पुन: किं आशान
दी अतिगहना अतीवगहनं यस्या: सा अतिगहना अन्यापि नदी गतिगहना पुन: किं आशानदी
प्रोत्तुंगचिंतातटी प्रोत्तुंगा चिंता एव तटी यस्या: सा अन्यापि नदी तटिनी प्रोच्यते तस्या नद्या: पार

वै॰टी॰ १२ १२

॥४८ [illegible]

श्लोक आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृक् नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा योयं धत्ते विषयकरिणी गाढरूढाभिमानो जीवस्यांतःकरणकरिणः संयमालानलीलां ४९ टीका अथान्यदाह हे तात तादृक् कोपि पुमान् अस्माकं नयनपदवीं नेत्रगोचरं वाथ वा श्रोत्रवर्त्म श्रवणमात्रेण गतः यः अयं जीवस्यांतःकरणकरिणः संयमालानलीलां किं विशिष्टः अयं विषयकरणी गाढरूढाभिमानः विषय एव करिणी हस्तिनी तस्यां गाढरूढो अभिमानो यस्य सः किं लक्षणानामस्माकं असंसारं यावत् इदं त्रिभुवनं चिन्वतां संचयतां वर्द्धयतां यो जितेंद्रियः स विरलः ४९ श्लोक ये वर्द्धंते धनपतिपुरः प्रार्थनादुःखभाजो ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः तेषामंतस्फुरितहसितं वासराणां स्मरेयं ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः॥ ५० टीका अथ अन्यदाह अहं तेषां वासराणां अंतःस्फुरितहसितं ध्यानच्छेदे स्मरेयं चिंतयामि ये वासराः धनपतिपुरो धनाढ्यानां पुरस्तात् प्रार्थनादुःखदीर्घाः [illegible] वर्त्तंते प्रार्थनादुःखैर्दीर्घाः चान्यत् ये वासराः विषयाक्षेपपर्यस्तबुद्धेः प्राणिनः अल्पत्वं अल्पानत्वं दधति विषयस्य आक्षेपः आदरः विषयाक्षेपः विषयाक्षेपेण विषयादरेण पर्यस्ता निराकृता बुद्धिर्येस्य सः विषयाक्षेपपर्यस्तबुद्धिः तस्य विषयाक्षेपपर्यस्तबुद्धेः किं विशिष्टः अहं शिखरिकुहर

प्रार्थनादुःखदीर्घाः ३

श्लोक विद्यानाधिगताकलंकरहिताविंत्तं चनोपार्जितं शुश्रूषापिसमाहितेनमनसापित्रोर्नसंपा
दिता: आलोलायतलोचनायुवतय:स्वप्नेपिनालिंगता: कालोयंपरपिंडलोलुपतयाकाकैरिव
प्रेरिता: ५१ टीका सांप्रतिंनिर्वेदितायाः सरूपमाह अहो अयंकाल: अस्माभि:पिंडलोलुपतया:
काकैरिवप्रेरिता: परपिंडस्यपरग्रासस्यलोलुपता: परपिंडलोलुपतातया: कथंअस्माभिर्वि।
द्यानाधिगतीनपठिता किंविशिष्टाविद्याकलंकरहितादोषरहितानिस्तुषाइत्यर्थ: चान्यत्‌वि
त्तंनोपार्जितंअपिपुन:समाहितेनमनसानिश्चलचित्तेनपित्रोर्माताजनकयो: शुश्रूषयेनसंपा
दितांनबहिताचान्यत्‌ स्वप्नेपियुवतयोनालिंगता: किंयुवतय: आलोलायतलोचना: आसमं
ताद्भावेनलोलानिचपलानिआयतानिदीर्घाणिलोचनानियस्यांता: आलोलायतलोचना:२
तस्मात्कारणात्‌मयैवजन्मगमितम्‌ ५१ श्लोक विनीर्णैसर्वस्वेतरुणकरुणापूर्णहृदया: स्म
रंत:संसारेविगुणपरिणामावधिगती: वयंपुण्येरण्येपरिणतशरच्चंद्रकिरणै त्रियामानै
ष्यामोहरचरणचित्तैकशरणा: ५२ टीका अन्यदाह वयंपुण्येपवित्रेअरण्येकदात्रयामा
नेष्याम:कै:समंपरिणितशारतचंद्रकिरणै:समंकोर्थ: परिणिता:परिणामंप्राप्ता: येशारत्का,
लीना:चंद्रकिरणा: परिणतशारच्चंद्रकिरणा: तैक्कसतिसतिसर्वस्वेसर्वधनेवितीर्णेसतिकिं
किंवयंहरचरणचित्तै:कृशरणाहरचरणावेवचित्तस्यएकंशरणंयेषांतेहरचरणचित्तैकशरणा: ५२॥

श्लोक वयमिहपरितुष्टावल्कलैस्त्वंचलक्ष्म्या समइहपरितोषोनिर्विशेषाविशेषः सतुभवतुदरि
द्रोयस्यतृष्णाविशाला मनसितुपरितुष्टेकोर्थवान्कोदरिद्रः ५३ टीका अथान्यदाह हेराजेंद्र
इहअस्मिन्संसारेवयंवल्कलैःपरितुष्टाः चान्यत् त्वंलक्ष्म्यापरितुष्टाः एतावतासंतोषस्यतत्त्व
मेकमेवइहअस्मिन्नर्थेपरितोषः समएवकिंचिद्विशिष्टः परितोषःनिर्विशेषाविशेषैःएवंविशेषान्निर्विशेषः
अवशेषानंयस्यसनिर्विशेषाविशेषम्यायंतु पुनःसदरिद्रोभवेत् यस्यपुरुषस्यविशालावि
स्तीर्णातृष्णाअनंततृष्णास्यपुंसःदरिद्रंकापिनयातीत्यागमः तुपुनःमनसिपरितुष्टेसति।
कोर्थवान् कोदरिद्रः अपितुनकोपि ५३ श्लोक यदेतत्स्वाछंदंविहरणमकार्पण्यमश
नं सहार्यैःसंवासःश्रुतमुपशमैकव्रतफलं मनोमंदस्पंदंबहिरपिचिरस्यापिविमृशन् नजा
नेकस्यैषापरिणतिरुदारस्यतपसः ५४ टीका अथान्यदाह परिणामोवर्त्तते एषाकापरि
णतिः यदेतत् स्वाछंदविहरणं अन्यच्च अकार्पण्यंअशनंप्रबलंभोजनं अन्यच्चसहार्यैःसं।
वासः परिकरेणसहनिवासः परिकरेणसहनिवासःउपशमैकव्रतंफलंउपशमरसोल्लासितं
श्रुतंशास्त्रंबहिरपिबाह्यप्रदेशेपिमनोमंदस्पंदंकल्पनारहितंअहंकिंकुर्वन् चिरस्यचि।
रकाल्यापिविमृशन् विमर्शनीकुर्वन् चिरकालंविचिंतयन्नित्यर्थः ५४॥ छ ॥

श्लोक पाणिपात्रं पवित्रं भ्रमणपरिगतं भैक्षमक्षय्यमन्नं विस्तीर्णवस्त्रमाशादशकममलं तल्पमःस्वल्पमुर्वी येषान्निःसंगतांगीकरणपरिणतिःस्वात्मसंतोषिणस्ते धन्याःसन्यस्त दैन्यव्यतिकरनिकराःकर्मनिर्मूलयंति ५५ टीका अथान्यदाह धन्यास्त एवयेकर्मनिर्मूल॰ यंतिकिं धन्याःसन्याःसंन्यस्तदैन्यव्यतिकरनिकराःसन्यस्तोनिराकृतःदैन्यव्यतिकरस्यानि करोयैःतेसन्यस्तदैन्यव्यतिकरनिकराः पुनःकिं॰ स्तेस्वात्मसंतोषिणःस्वात्मन्येवसंतोषोये षांतेस्वात्मसंतोषिणः अन्यच्चयेषांपुरुषाणांनिःसंगतांगीकरणपरिणतिः निःसंगतायाः अंगीकरणंनिःसंगतांगीकरणंतस्यपरिणतिः निःसंयेषांपुरुषाणांपात्रंभोजनभांडंपाणिः हस्तःपवित्रंभ्रमणपरिगतंभैक्ष्यंअक्षयंअव्ययंअन्नंवस्त्रंविस्तीर्णंआशादशकंअयमलं निर्मलंअस्वल्पंविस्तीर्णंशय्याउर्वीपृथ्वीएवंविधिस्वरूपेणयेसंसारपारंगछंतितएवध न्याः ५५ श्लोक दुराराध्याःस्वामीतुरगचलचित्ताःक्षितिभुजो वयंतुस्थूलेच्छामहतिच पदेबद्धमनसः जरादेहंमृत्युर्हरतिसकलंजीवितमिदं सखेनान्यत्श्रेयोजगतिविदुषोऽन्य त्रतपसः ५६ टीका अथान्यदाह हेसखेजगतिरसायोविदुःखःपंडितस्यतपसःअन्य त्श्रेयःकल्याणंस्वामीअधिपतिःदुराराध्यःक्षितिभुजोराजानःतुरगचलचित्ताःतुरंगम

नकथं १

५६ ॥

वै.टी. १४

श्लोक भोगामेघवितानमध्यविलसत्सौदामनीचंचला आयुर्वायुविघट्टिताभ्रपटलीलीनांबु
वद्भंगुरं लोलायौवनलालनातनुभृतामित्याकलय्यद्रुतं योगेधैर्यसमाधिसिद्धिसुभगेबु
द्धिंविदध्वंबुधाः ५७ टीका अथान्यदाह हेबुधाः पंडिताः योगेमनोवचनकायसंरोधलक्ष
णेबुद्धिंविदध्वंइतरद्दरिविकल्पंतुषप्रायंकथंभोगाः पंचांगाः मेघवितानमध्यविलसत्सौ
दामिनीचंचलाः कोर्थः मेघवितानमध्येविलसंतीयासौदामिनीविद्युद्वच्चंचलाः चान्यत्॥
आयुर्जीवितंवायुविघट्टिताभ्रपटलीलीनांबुवत् भंगुरंवायुनाविघट्टितायाअभ्रपटलील
त्रलीनंपदंबुपानीयंतद्वद्भंगुरंविनाशशीलंवायुविघट्टिताभ्रपटलीलीनांबुवत्भंगुरंतनुभृ
तांप्राणिनांयौवनलालनात् तारुण्यप्रतिपालनालोलाचंचलावर्त्तते इतिआकलय्यइति
विचिंत्यद्रुतंशीघ्रंयोगेमनोविदध्वम् ५७ श्लोक पुण्यैर्ग्रामेवनेवामहतिसितपटच्छिन्नपा
लीकपालीं मादायन्यायगर्भद्विजहुतहुतभुग् धूमधूम्रोपकंठं द्वारंद्वारंप्रवृत्तोवरमुदरदरी
पूरणायक्षुधार्त्तो मानीप्राणीसधन्योनपुनरनुदिनंतुल्यकुल्येषुदीनः ५८ टीका अ
न्यथादाह मानीप्राणीअभिमानीपुमान्क्षुधार्त्तः सुधन्यः सुष्ठुवरंपुनः तुल्यकुलेषुअनु
दिनंदीनोनवरंतुल्यकुल्येषुभावः तुल्यकुल्याः तेषुपुनः प्राणीउदरदरीपूरणायद्वारंप्रवृ
त्तोयासौहुतभुग्वैश्वानरः तस्ययोसौधूमः प्रचुरोधूम्रस्तेनव्याप्तउपकंठंयस्यतत्न्यायगर्भद्विजहुत

धूमधूम्रोपकंठं ५८

१४

श्लोक चंडालः किमयंद्विजातिरथवाशूद्रोथकिंतापसः किंवातत्वनिवेशपेशलमतियोगीश्वरः
कोपिकिं इत्युत्पन्नविकल्पजल्पमुखरैः संभाष्यमानोजनैः नक्रुद्धापथिनैवतुष्टमनसोयास्यंति
तेयोगिनः ५९ टीका अन्यदाह तएवयोगिनोयेपथिमार्गेजनैः एवंसंभाष्यमाणाः नक्रुद्धाः या
स्यंतिनैवतुष्टमनसोयास्यंतिकिं वि॰ जनैः इति अमुनाप्रकारेणविकल्पमुखरैः इतीतिकिंअयं
किंचांडालः वाथवाद्विजोब्राह्मणः अथवाशूद्रः अथवाकिंतापसः वाथवायोगीश्वरः किं वि॰
योगेश्वरः तत्वनिवेशपेशलमतिः तत्वनिवेशपेशलेमनोज्ञामतिर्यस्यअसौ एवंविधानिर्विक
ल्पास्तएवधन्याः ५९ श्लोक सखेधन्याः केचित्त्रुटितभवबंधव्यतिकराः वनांतेचित्तांतर्विष
मविषयाशीविषगताः शरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभगां नयंतेयेरात्रिंसुकृतचयचित्तै
कशरणाः ६० टीका अथान्यदाह हेसखेहेमित्रतएवकेचित् धन्याः येएवंप्रकारेणरात्रिंनयं
तिकिं वि॰ धन्याः तेसुकृतचयचित्तैकशरणाः सुकृतानांचयः समूहः सुकृतचयः सुकृतचयचित्ते
एकंशरणंएषांते सुकृतचयचित्तैकशरणाः पुनः किं वि॰ त्रुटित॰ भवबंधव्यतिकराः त्रुटितोभ
वबंधस्यव्यतिकरोयेषांते त्रुटितभवबंधव्यतिकराः पुनः किं वि॰ वनांतेवनमध्ये चित्तांतर्विषमवि
षयाशीविषगताः चित्तांतर्मोमनस मध्येविषमोयोसौविषयएवआशीविषः दृष्टीविषोरागोगतोता
कांत्याधवलेनगगनाभोगेननभोविस्तारेणसुभगामनोज्ञासाशरच्चंद्रज्योत्स्नाधवलगगनाभोगसुभ
गांताम् ६०॥

वै॰टी॰ १५ 15

श्लोक एतस्माद्विरमेंद्रियार्थगहनादायासकाराश्रयात् श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षंक्ष
णात् शांतंभावमुपैहि संत्यजनिजांकल्लोललोलांगतिं माभूयोमजभंगुरांभवरतिं चेतः प्रसीदाधु
ना ६१ टीका अथान्यदाह हे चेतः हे आत्मन् अधुनाप्रसीद प्रसादंकुरु एतस्मादिंद्रियार्थगहनात्
विरम किं वि॰ इंद्रियार्थगहनात् आयासकाराश्रयात् कुत्सिताः आश्रयः कदाश्रयः कदाश्रयस्य
भावोकादाश्रयः आयासेनकादाश्रयैः तस्मात् आ॰ क्षणात् [illegible]वं शांतंभावंउपैहि किं॰ शांतंभावं
श्रेयोमार्गमोक्षः मार्गपुनः किं॰ शांतंभावंअशेषदुःखव्यापारदक्षंअशेषानितिषांशमनव्यापा
रदक्षः अशेषदुःखमनव्यापारदक्षः ते अहे चेतः निजांकल्लोललोलांगतंत्यजप॰रिहर भूयः पु
नरपिभंगुरांविनश्वरांभवति माभजमासेवएभिर्लक्षणैः संसरस्यवृद्धिरेवस्यात् ततस्तस्मा
त्कारणात् तानिचेष्टितानित्यज ६१ श्लोक पुण्यैर्मूलफलैः प्रियेप्रणयिनि प्रीतिंकुरुष्वाधु
ना भूशय्यानववल्कलैरकरुणैरुत्तिष्ठयामोवनं क्षुद्राणामविवेकमूढमनसायत्रेश्वराणां
सदा चित्तव्याधिविवेकविक्लवगिरांनामापिनश्रूयते ६२ टीका अथान्यदाह हे प्रणयिनि
हे प्रिये उत्तिष्ठ वनं यामः यत्र अविवेकमूढमनसां ईश्वराणांधनवतांनामापिनश्रूयते किं वि॰
ईश्वराणांक्षुद्राणांतुच्छानां अन्यच्च अविवेकमूढमनसां तेषांपुनरपि किं वि॰ ईश्वराणांचित्तव्याधि
रैः प्रीतिकुरुष्व कि॰ नववल्कलैः अकरुणैः क्रियत इति करणं अकरणं तैः अकरुणैः करणक्रियार
दितैरित्यर्थः ६२॥ अविवेकेन मूढमनसः २

पानि॰दुःखानि

१५

वान्यत् तडिल्लेखास्वस्योदामिनीषुकः प्रत्ययः ५

श्लोक मोहं मार्जयतामुपार्जयरतिं चंद्रार्द्धचूडामणौ चेतः स्वर्गतरंगिणीतटभुवामासंगमंगीकुरु। कोवावीचिषुबुद्बुदेषुचतडिल्लेखासुचस्त्रीषुच ज्वालाग्नेषुचपन्नगेषुचसरिद्वेगेषुकः प्रत्ययः ६३ टीका अथान्यदाह रेचेतः मोहंमार्जयतां रेप्राणिन् चंद्रार्द्धचूडामणौरतिसंतोषं उपार्जयरे चेतः स्वर्गतरंगिणीतटभुजां आसंगं संगतिं अंगीकुरु नुअस्माकं वाथवा कोवीचिषुकल्लोलेषु प्रत्ययो विश्वासः चान्यत् जलबुद्बुदेषु वर्षोवारिस्थपुटेषुकः प्रत्ययः चस्त्रीषुकः चान्यत ॥ ज्वालाग्निषुकः प्रत्ययः चान्यत् पन्नगेषुकः प्रत्ययः चान्यत् सरिद्वेगेषुचः प्रत्ययः तटनीप्रवाहेषु यथा एतेषु स्थानकेषु नो अस्माकं प्रत्ययो नास्ति तथा जीवतेषु जीवतव्येषुकः प्रत्ययः ॥ कोविश्वासः अपितु नविश्वासः ६३ श्लोक अंगनगीलंसरसकवयः पार्थितो दाक्षिणात्याः। पृष्ठेलीलाबलपरिणतं चामरग्राहिणीनां यद्यस्त्येवंकुरुभवरसास्वादनेलंपटत्वं नोचेच्चेतः प्रविशसहसानिर्विकल्पेसमाधौ ६४ टीका अथान्यदाह रेचेतः यदिएवमस्तितदाभवरसास्वादनेलंपटत्वंकुरु एवंकिं यदितवाग्रेस्फीतिं गतिंभवति अन्यच्च पार्थितो दाक्षिणात्याः दक्षिणदेशीयाः सरसकवयो भवंति अन्यच्च पृष्ठे चामरग्राहिणीनां सुंदरीणां बलयरणितिं भवति यद्येवंविधं सौख्यं भवति तदा संसारस्य ममतां कुरु रेचेतः चेदेवं न तदा सहसा निर्विकल्पे समाधौ प्रविशप्रवेशं कुरु ६४ ॥

वै॰ टी॰
३६

16

श्लोक विरमत बुधा योषित्संगात्सुखात्क्षणभंगुरात् भजत करुणामैत्रीप्रज्ञावधूजनसंगमं। न खलु नरके हाराक्रांतं घनं स्तनमंडलं शरणमथवा श्रोणीबिंबं रणन्मणिमेखलम् ॥ ६५ ॥

टीका अथान्यदाह हे बुधा योषित्संगात् सुखात् विरमत विरतिं भजत किंवि॰ योषित्संगात्सुखात् क्षणभंगुरात् करुणामैत्रीप्रज्ञावधूजनसंगमं कुरुते विदधत् करुणा च मैत्री च प्रज्ञा च करुणामैत्रीप्रज्ञा मेव वधूजनः तस्य संगमः तं करुणामैत्रीप्रज्ञावधूजनैः संगमं खलु निश्चितं नरके घनं स्तनमंडलं अथवा श्रोणीबिंबं नितंबबिंबं शरणं न किंवि॰ स्तनमंडलं हाराक्रांतं तारैर्विभूषितं किंवि॰ श्रोणीबिंबं रणन्मणिमेखलं रणंती शब्दंती मणिमेखला यस्मिन् तत् रणन्मणिमेखलम् ॥ ६५ ॥

श्लोक प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषां तृष्णास्रोतो विभंगो गुरुषु च विनयः सर्वभूतानुकंपा सामान्या सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पंथाः ॥ ६६ ॥

टीका अथान्यदाह हे आत्मन् अनुपहतविधिः श्रेयसां पुरुषाणां एषः पंथाः न उपहत न निराकृतः अनुपहतेन। विधिना मार्गेण श्रेयसां ते अनुपहतविधिः श्रेयसस्तेषां मुक्तानामित्यर्थः तेषामेष मार्गः एषः कस्तत्कथ्यते प्राणाघातान्निवृत्तिः जीवहिंसाविरामः परधनहरणे परद्रव्यापहारे संयमः यमउ... सर्वशास्त्रेषु सामान्या समानस्य भावः सामान्यं सामान्या इत्यर्थः मोक्षमार्गिणामेष मार्गः ॥ ६६ ॥

श्लोक मातर्लक्ष्मीभजस्वकंचिदपरंमत्कांक्षिणीमास्मभूः भोगेभ्यस्पृहयालवोनहिवयंकानिस्पृ
हाणामसि सद्यस्यूतपलाशपत्रपुटिकापात्रेपवित्रीकृते भिक्षासक्तुभिरेवसंप्रतिवयंवृत्तिंस
मीहामहे ६७ टीका अथान्यदाह हेमातःलक्ष्मि कंचिदपरंभजस्वमत्कांक्षिणीमास्मभूः।
माभूयःवयंभोगेभ्योनस्पृहयालवः नेच्छवः असित्वंनिस्पृहाणांविरीहाणांकावयंभिक्षासक्तु
भिरेवसंप्रति इदानींवृत्तिंदिनगमनिकांसमीहामहेवांछामहेक्व सतिसद्यस्तत्कालंस्यूतप
लाशपत्रपुटिकापात्रेपवित्रीकृतेसति यद्येवमस्माकंस्थितसदावयंत्वयाकिंकुर्मे ६७ श्लो
क यूयंवयंवयंयूयमित्यासीन्मतिरावयोः किंयातमधुनायेनयूयंयूयंवयंवयं ६८ टीका अ
थान्यदाह हेमित्रआवयोरितिमतिरासीदियत्कालं इतीति किंयूयंवयंवयंयूयं अधुनाइदा
नींकिंयातंयेन यूयंयूयंवयंवयं ६८ श्लोक इयंबालामांप्रत्यनवरतमिंदीवरदल प्रभाचो
रंचक्षुःक्षिपतिकिमभिप्रेतमनया गतोमोहोस्माकंस्मरकुसुमबाणव्यतिकर ज्वरज्वालाशां
तातदपिनवराकीविरमति ६९ टीका अथान्यदाह इयंबालामांप्रतिचक्षुःनेत्रंअनवरतंनि
रंतरंकिंक्षिपति किंवि० नेत्रंइंदीवरदलप्रभाचोरंइंदिवरस्यकमलस्यदलंइंदीवरदलंतस्यप्र
भाचोरयतीति इंदीवरदलप्रभाचोरंअनयाकिमभिप्रेतंकिंवांछितंअस्माकंमोहोगतः स्मरकुसु
मबाणव्यतिज्वरज्वालाशांतातवराकी तदपिनविरमति ६९ ॥

कर

वै॰ टी॰ १७

17

श्लोक रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये।
किं तूद्भ्रांतपतत्पतंगपवनव्यालोलदीपांकुरच्छायाचंचलमाकलय्य सकलं संतो वनांतं गताः ७०
टीका अथान्यदाह संतः सत्पुरुषाः वनांतं गताः किमिति संभावनायां तेषां वसतये निवासाय हर्म्य
तलं रम्यं नाभूत् अपितु अभूत् किमिति संभावनायां वाथवा श्रव्यं श्रवणार्हं गेयादिकं गीतादि ना
भूत् अपितु अभूत् वाथवा किमिति संभावनायां प्राणसमासमागमसुखं प्राणतुल्या या प्रिया त
स्याः समागमः संगतस्य सुखं प्राणसमासमागमसुखं अधिकप्रीतये अतिप्रसन्नतायै नाभू
त् अपितु अभूत् तथापि संतो वनांतं गताः वनं सेवयामासुः किंतु उद्भ्रांतपतत् पतंगपवनव्या।
लोलदीपांकुरच्छायाचंचलं तु पुनः किमर्थं वनं सेवयामासुः उद्भ्रांतचक्षुः लोभेन भ्रमं प्राप्तः यो
सौ पतत् पतंगः तस्य पवनेन व्यालोलचंचला या दीपांकुरस्य छाया कांतिस्तद्वच्चंचलं सकलं।
जीवलोकं विनश्वरं आकलय्य विचिंत्य हृदये ज्ञात्वा संसारोद्गता इत्यर्थः ७० श्लोक कंदः
कंदरेभ्यः प्रलयमुपगता निर्झराः वा गिरिभ्यः प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिभ्यः
श्च त्वाखाः वीक्ष्यंते यन्मुखानि प्रसभमुपगतप्रश्रयाणां खलानां दुःखोपात्ताल्पवित्तस्मयपवनवशाय
वनानर्तितभ्रूलतानि ७१ टीका अथान्यदाह यत्तु खलानां दुर्जनानां मुखानि वीक्षंते विलोक्यं
ते यतस्तेनेति यत्संबंधः तत्किं कंदरेभ्यः कंदाः प्रलयं उपगताः क्षयं जग्मुः वाथवा गिरिभ्यः पर्वतेभ्यः निर्झ
र्त्तिता भ्रूलता यैः तानि दुःखोपात्ताल्पवित्तस्मयपवनानर्तितभ्रूलतानि ७१ ॥

हिमवत

श्लोक गंगातरंगकणशीकरशीतलानि विद्याधराध्युषितचारुशिलातलानि स्थानानि किं हिमवतः प्रलयंगतानि यत्सावमानिपरपिंडरता: मनुष्याः ७२ टीका अथान्यदाह मनुष्याः यत्सावमानपरिपिंडरताः वर्त्तंते तत्किं हि हिमवत्स्थानानि प्रलयंगतानि किं वि० हिमवतः स्थानानि गंगातरंगकणशीकरशीतलानि गंगायास्तरंगा गंगातरंगास्तेषां कणशीकरैः शीतलानि गंगातरंगकणशीकरशीतलानि पुनः किं वि० स्थानानि विद्याधराध्युषितचारुशिलानि विद्याधरैरध्युषितानि सेवितानि अधिष्ठितानि चारुशिलातलानि एषां तानि एवंविधानि स्थानानि चेत्स्युस्तदा परतिरस्कारपिंडरताः नराः भवेयुः एतावता परावमानं त्यक्त्वा एवंस्थानानि सेवतानि वरान् ७२ श्लोक यदा मेरुः श्रीमान्निपतति युगांताग्निनिहिताः समुद्राः क्षुभ्यंति प्रचुरनिकरग्राहनिलया धरा गच्छत्यंतं धरणिधरपादैरपि धृता शरीरे का वार्त्ता करिकलभकर्णाग्रचपले: ७३ टीका अथान्यदाह यदा श्रीमान्मेरुः युगांताग्निनिहितो निपातति समुद्राः क्षुभ्यंति किं वि० समुद्राः प्रचुरनिकरग्राहनिलयाः प्रचुराश्च ते निकराः समूहाः ग्राहाणां जलचरजीवानां निलयाः गृहाणि येषु ते प्रचुरनिकरग्राहनिलयाः अपि पुनः धरा वसुंधरा अंतं गच्छति विलयं व्रजति किं धराधरणीधरपादैः धृतापि अवलंबितापि तदा शरीरे का वार्त्ता किं शरीरे करिकलभकर्णाग्रचपले करिकलभानां कर्णाग्रवत् चपले करिकलभकर्णाग्रचपले तस्मिन् ७३ ॥

नला

श्लोक एकाकी निस्पृहः शांतः पाणिपात्रो दिगंबरः कदा शंभो भविष्यामि कर्मनिर्मूलनक्षमः ७४
टीका अथान्यदाह हे शंभो अहं एतादृशः कदा भविष्यामि किंवि॰ अहं एकाकी अद्वितीयः पुनः
किं॰ अहं निस्पृहः पुनरपि किं अहं शांतः पुनरपि किं अहं पाणिपात्रः पाण्येव करौ पात्रं भांडं य
स्य स पाणीपात्रः पुनरपि किं॰ अहं दिगंबरः दिश एव अंबरं यस्य स दिगंबरः पुनरपि किं॰।
अहं कर्मनिर्मूलनक्षमः कर्मणां निर्मूलने कर्मनिर्मूलने क्षमः कर्मनिर्मूलनक्षमः ७४॥
श्लोक प्राप्ताः श्रियः सकलकामदुघास्ततः किं दत्तं पदं शिरसि विद्विषतां ततः किं सन्मानि
ताः प्रणयिनो विभवैस्ततः किं कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ७५ टीका अथान्य
दाह श्रियः लक्ष्मीः प्राप्ताः ततः किं॰ श्रियः सकल[illegible]कामदुघाः समस्तमनोरथदोग्ध्र्यः
विद्विषतां शिरसि मस्तके पदं दत्तं ततः किं॰ प्रणयिनः स्नेहिनः विभवैर्धनैः सन्मानिता ततः
किं॰ तनुभृतां प्राणिनां तनुभिः शरीरैः कल्पकल्पांतं यावत् स्थितं प्राणितं ततः किं॰ एतावता
संसारस्य निर्गमतेव परं श्रेष्ठं ७५ श्लोक भक्तिर्भवे मरणजन्मभयं हृदिस्थं स्नेहो न बं
धुषु न मन्मथजा विकाराः संसर्गदोषरहिता विजना वनांता वैराग्यमस्ति किमतः परमा
र्थनीयं ७६ टीका अथान्यदाह अतः परं किं वैराग्यमस्ति न किं भक्तिर्भवे महेश अन्यं च
[illegible]दोषरहिताः अतोपि वैराग्यं किमपि नास्ति किं वि॰ वैराग्यं परमार्थनीयं परमतत्वयुतं ७६॥

श्लोक तस्मादनंतमजरं परमं विकाशि तद्ब्रह्म वांछित जना यदि चेत्तनस्थाः यस्यानुषंगिण इमे भवनाधिपत्यभोगादयः कृपणलोकरता भवंति ७७ टीका अन्वयमाह हे जना यदि यूयं चेत्तनस्थाः तत्तस्मात् ब्रह्म वांछित किंवि॰ ब्रह्म अनंतं अंतरहितं अजरं जरावर्जितं पुनः किंवि॰ ब्रह्म परमं विकाशि यस्य परंब्रह्मणः इमे भवनाधिपत्यभोगादयः अनुषंगिणो भवंति अनुपायिनो भवंते किंवि॰ भवनाधिपत्यभोगादयः कृपणलोकरताः तुच्छजनविभ्रमाः ७७ श्लोक पाताल मा विशसि यासि नभो विलंघ्य दिग्मंडलं भ्रमसि मानसचापलेन भ्रांत्यापि जातु विमलं कथमात्मनीनं तद्ब्रह्म न स्मरसि निर्वृतिमेषि येन ७८ टीका अन्वयमाह रे मूढ पातालं आविशसि अन्यच्च नभः आकाशं विलंघ्य यासि अन्यच्च दिग्मंडलं भ्रमसि केन मानसचापलेन मानसस्य चापलं मानसचापलं तेन मानसचापलेन जातु कदाचित् भ्रांत्यापि तत् ब्रह्म कथं न स्मरसि येन ब्रह्मणा निर्वृतिं एषि मुक्तिं प्राप्नोषि किंवि॰ ब्रह्म आत्मनीनं कोर्थः आत्मनः हितं आत्मनीनं पुनरपि किं॰ ब्रह्म विमलं निर्मलम् ७८ श्लोक रात्रिः सैव पुनः स एव दिवसो मत्वा बुधाः जंतवो धावंत्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना संसारेण कदर्थिता कथमहो मोहान्न लज्जामहे ७९ टीका अथान्यदाह अहो इति दुःखे अमुना विधेनामुना संसारेण लोक कदर्थिता कस्मात् मोहात् मोहात् कथं न लज्जामहे कैः व्यापारैः कथंभूतैः व्यापारैः पुनरुक्तभुक्तविषयैः पुनः पुनर्विहितानि यकाल एवंविधं संसारस्य स्वरूपं मत्वा न मा... विरक्ता एव भवंति न जनाः ७९॥

वै॰टी॰ १९

श्लोक महीशय्यापृथ्वीविपुलमुपधानं भुजलता वितानं चाकाशं व्यजनमनुकूलोयमनिलः स्फुरद्दीपश्चंद्रो विरतिवनितासंगमुदितः सुखंशांतः शेते मुनिरतनुभूतिर्नृपइव ८० टीका अथान्यदाह शांतो मुनिः सुखं यथा भवति शेते यस्य मुनेः महीशय्या पृथ्वी स्वापः शयनं यस्य मुनेर्विपुलं मुपधानं गडुषः भुजलताः चान्यच्च वितानं चंद्रोदयः आकाशं अयं अनुकूलः पवनः व्यजनं तालवृंतं चान्यत् चंद्रः स्फुरद्दीपः चान्यत् विरतिवनितासंगंप्रति उदितमुनिकइवनृपइव यथा नृपः महीशय्यापृथ्वीशायिनी शय्या भवति अन्यच्च विपुलं उपधानो भवति विस्तीर्णं गंडुवो भवति चान्यत् आकाशं मस्तकोपरि वितानं भवति चान्यत् विजनानिलेन वीजितो भवति अन्यच्च स्फुरद्दीपो भवति अन्यच्च वनितासंगं प्रति उदितो भवति किं वि॰ मुनिः किं वि॰ नृपः अत॰नुभूतिः अतन्वी भूतिर्विभूतिर्यस्य पक्षेलक्ष्मीः ८० श्लोक त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने तल्लब्ध्वासनवस्त्रमानघटने भोगे रतिं माकृथाः भोगः कोपि स एक एव परमो नित्योदितो जृंभने यत्स्वादात् विरसाभवंति विषयास्त्रैलोक्यराज्यादयः ८१ टीका अथान्यदाह हे आत्मन् तत्परब्रह्मलब्ध्वा भोगे रतिं माकृथाः यस्मिन्परब्रह्मणि एवनिश्चयेन त्रैलोक्याधिपतित्वं विरसं वर्त्तते किं वि॰ परब्रह्मणि महाशासने प्रौढमते किं॰ भोगे आसनवस्त्रमानघटने आसनं सिंहासनं सुखासनादिवस्त्राणि चीनांशुकपट्टदुकूलादिमाने मर्याद्यो विषयाः विरसाभवंति मोक्षदायकत्वात् ८१ ॥ छ ॥ छ ॥ छ ॥ छ ॥

१९

श्लोक किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रिया
विभ्रमैः मुक्त्वैकं भवभारदुःखरचनाविध्वंसकालानलं स्वात्मानंदपदप्रवेशकलनं शेषाः वणिग्वृत्
तयः ८२ टीका अथान्यदाह वेदैः किं स्मृतिभिः पुराणपठनैः किं शास्त्रैः किं किंवि॰ शास्त्रैर्महावि
स्तरैः महान्विस्तरो येषां ते महाविस्ताराः तैर्महाकर्मक्रियाविभ्रमैः स्वर्गग्रामकुटीनिवासफलदैः
स्वर्गग्रामस्यकुटी स्वर्गग्रामकुटी तस्यां निवासफलं ददातीति स्वर्गग्रामकुटीनिवासफलदाः तैः स्व
र्गग्रामः एकं स्वात्मानंदपदप्रवेशकलनं भयं स्वकीयो सौ आत्मा तस्य यत् आनंदपदं स्वात्मानंदप
दं तस्य प्रवेशकलनं स्वात्मानंदप्रवेशकलनं क्रियते किं कृत्वा एकं भवभारदुःखरचनाविध्वंस
कालानलं मुक्त्वा शेषाः क्रियाः वणिक्वृत्तयः वणिगाचरणम् ८२ श्लोक आयुः कल्लोललोलं
कतिपयदिवसस्थायिनी यौवनश्री रर्थाः संकल्पकल्पाः घनसमयतडिद्विभ्रमा भोगपूगाः कंठा
श्लेषोपगूढं तदपि च न चिरं यत्प्रियाभिः प्रणीतं ब्रह्मण्यासक्तचित्ता भवत भवभयांभोधिपारं तरीतं
८३ टीका अथान्यदाह हे उत्तमाः ब्रह्मणि परब्रह्मणि आसक्तचित्ता भवत यूयं किं कर्तुं भवभयांभो
धिपारं तरीतुं भवभयांभोधेः पारः भवभयांभोधिपारं स्तं भवनभयांभोधिपारं शेष समस्तमस्थिरं किं
किं आयुः कल्लोललोलं समुद्रकल्लोलवत् चपलं यौवनश्रीः कतिपयदिवसस्थायिनी कतिदिवसान्
श्लेषोपगूढं तं तदपि न चिरं तस्मिन्कारणे परब्रह्मण एव शास्वतं ८३ ॥ ॥ ॥

वै·टी·
४०

श्लोक ब्रह्मांडमंडलीमात्रं किं लोभाय मनस्विनः शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ८४ टी
का अथान्यदाह मनस्विनः जितेंद्रियस्य ब्रह्मांडमंडलीमात्रं किं लोभाय जायते अपितु न ब्रह्मांडस्य मंड
ली ब्रह्मांडमंडली एवमात्रा यस्य तत् ब्रह्मांडमंडली ब्रह्मांडमंडलीमात्रं अन्यच्च अब्धेः समुद्रस्य शफ
रीस्फुरितेन मत्सिकाचलनेन जातु कदाचित् क्षुब्धता क्षोभमाना जायते अपितु न तथा मनस्विनः
पुरुषस्य ब्रह्मांडे लोभाय न जायते ८४ श्लोक यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं तदा दृष्टं
नारीमयमिदमशेषं जगदपि इदानीमस्माकं पटुतरविवेकांजनजुषां समीभूता दृष्टिः त्रिभुवन
मपि ब्रह्म तनुते ८५ टीका अथान्यदाह यदा यस्मिन्प्रस्तावे अज्ञानं आसीत् तदा इदं अशेषं जग
दपि नारीमयं दृष्टं किं लक्षणं अज्ञानं स्मरतिमिरसंस्कारजनितं स्मरस्य कंदर्पस्य यत्तिमिरं अंधका
रं तस्य संस्कारेण पूर्वभवोद्भवपरिणामेन जनितं इदानीं सांप्रतं अस्माकं समीसमीभूता दृष्टिः स
मतापरिणामेनालंकृतं चेतः त्रिभुवनमपि ब्रह्म तनुते परब्रह्मस्वरूपं विस्तारयति किं वि· अस्मा
कं पटुतरविवेकांजनजुषां प्रकृष्टः पटुः पटुतरः पटुतरो यो सो विवेकः स एवांजनं तत् पटुतरविवे
कांजनं तेन जुषः पटुतरविवेकांजनेन जुषाः सेवनं येषां ते पटुतरविवेकांजनजुषः तेषां पटुः ८५
श्लोक रम्याश्चंद्रमरीचयः तृणवती रम्या वनांतस्थली रम्यः साधुसमागमः शमसुखं काव्येषु रम्या
कथा कोपोपाहितबाष्पबिंदुतरलं रम्यं प्रियायाः मुखं सर्वं रम्य अनित्यतामुपगते चित्ते न किंचित् पुनः ८६॥

श्लोक भिक्षाशी जनमध्यसंगरहितः स्वायत्तचेष्टः सदा दानादानविरक्तमार्गनिरतः कश्चित्तपः
स्वी स्थितः रथ्याक्षीणविशीर्णजीर्णवसनैः संप्राप्तकंथासखो निर्मानो निरहंकृतिः शामसुखाभो
गैकबद्धस्पृहः ९७ टीका अथान्यदाह एवंविधः तपस्वी कश्चित् विरलः स्थितो वर्त्तते कीदृशः
भिक्षाशी भिक्षाभोजनः पुनः किं॰ तपस्वी जनमध्यसंगरहितः पुनः किं॰ तपस्वी सदासर्वदा स्वाय
त्तचेष्टः स्वाधीनमानसपरिणामः पुनः कीदृशः तपस्वी दानन विरक्तमार्गनिरतः दानंअदानंच
दानादाने दानादानयोः विरक्तमार्गः तत्रनिरतः सावधान पुनः कीदृशः तपस्वी रथ्याक्षीणविशी
र्णजीर्णवसनैसंप्राप्तकंथासखः रथ्यायाः क्षीणानि विशीर्णानि जीर्णानि वसनानि रथ्याक्षीणवि
शीर्णवसनानि तैः कृत्वा संप्राप्ता कंथा सखी पत्नी सहायिनी येन सः पुनरपि कीदृशः तपस्वी निर्मा
नः नात्मज्ञः पुनः कीदृशः तपस्वी निरहंकृतिः निरहंकारः पुनः की॰ तप॰ शमसुखाभोगैकबद्धः स्पृ
हः शमस्य सुखं तस्य आभोगविस्तारे एकः बद्धा स्पृहा वांछा येन सः शम ९७ श्लोक मातर्मेदिनि
तात मारुत सखे तेजः सुबंधो जल भ्रातर्व्योम निबद्ध एष भवतामन्त्यप्रणामांजलिः युष्मत्संगवशोप
जातसुकृतोद्रेकस्फुरन्निर्मल ज्ञानापास्त समस्त मोहमहिमा लीये परब्रह्मणि ९८ टीका अथान्य
दाह हे मातः मेदिनी हे तात मारुत हे सखे तेजः हे सुबंधो जल हे भ्रात व्योम भवतां पंचतत्वानाम् एषः अंत्य
सयुष्मत्संगवशोपजात सुकृतोद्रेक स्फुरन्निर्मल ज्ञानापास्तसमस्त मोहमहिमा ९८ ॥ ॥ ॥

वै·टी· श्लोक यावत्स्वस्थमिदं शरीरमरुजं यावच्च दूरे जरा यावच्चेंद्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः॥

२१ आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान् संदीप्ते भवने प्रकूपखननं प्रत्युद्यमः कीदृशः ८९।

२१ टीका अथान्यदाह विदुषां पंडितेन आत्मश्रेयसि स्वमोक्षोपाये तावदेव महान् प्रयत्नः कार्यः याव दिदं कालेवरगृहं शरीरमंदिरं स्वस्थं वर्त्तते समाधानपरायणं वर्त्तते चान्यच्च यावत् जरा दूरे वर्त्त ते यावत् इंद्रियशक्तिः अप्रतिहतं वर्त्तते चान्यत् यावत् आयुषः क्षयो नास्ति तावदेव स्वहिते प्रय त्नः कार्यः भवने उद्दीप्ते प्रदीप्ते सति प्रकूपखनने कीदृशः प्रत्युद्यमः ननु प्रदीपने प्रदीप्ते सति कूपं खनितुं न शक्यते ८९ श्लोक नाभ्यस्ता भुवि वादिवृंददमनी विद्या विनीतोचिता खड्गा ग्रैः करिकुंभपीठदलनैर्नाकं न नीतं यशः कांताकोमलपल्लवाधररसः पीतो न चंद्रोदये ता रुण्यं गतमेव निष्फलमहो भून्यालये दीपवत् ९० टीका अथान्यदाह भुवि पृथिव्यां विद्या न अभ्यस्ता किंवि· विद्या वादिवृंददमिनी पुनः किं· विद्या विनीतोचिता विनयवतः पुरुषस्य

स्वर्गलोकं यो ग्या खड्गाग्रैः कृपाणधाराभिः यशः नाकं प्रति न नीतं किंवि· खड्गाग्रैः करिकुंभपीठदलनैः क रिणां कुंभपीठं करिकुंभपीठं तद्दलने शीलमेषां ते करिकुंभपीठदलनाः तैः करि· चान्यत् चंद्रो दये कांताकोमलपल्लवाधररसो पीतः अहो इति खेदे तारुण्यं यौवनं निष्फलमेव गतं किंवत्॥ २१

भून्यालदीपवत् ९०॥

श्लोक ज्ञानं सतां मानमदादिनाशनं केषांचिदेतन्मदमानकारणं स्थानं विमुक्तं मुनिनां विमु-
क्तये कामातुराणामतिकामकारणं ११ टीका अथान्यदाह सतां सत्पुरुषाणां ज्ञानं मानम-
दादिनाशं भवति केषांचित् अधमानां एतत् ज्ञानं मदमानकारणं भवति अमुमेवार्थं कविर्द्दा-
ष्टांतेन दृढयति यमिनां मुनीनां विविक्तं स्थानं एकांतप्रदेशाः विमुक्तये भवति संसारोच्छेदनाय
स्यात् कामातुराणां पुरुषाणां तदेव विविक्तं निर्जनं अतिकामकारणं भवति कामविकाराय स्या-
त् ११ श्लोक जीर्णा एव मनोरथाः सुहृदये जातं जरायौवनं हंतांगेषु गुणाश्च बंध्यफलतां जा-
ता गुणज्ञैर्विना किं युक्तं सहसाभ्युपैति बलवान् कालः कृतांतोक्षमी ह्या ज्ञातं त्रिपुरांतकांघ्रियुग-
लं मुक्तास्ति नान्या गतिः १२ टीका अथान्यदाह मनोरथाः सुहृदये जीर्णा एव यौवनं जरा व्या-
प्तं हंतं इति खेदद्योत्यते कालोयमः सहसा अभ्युपैति किं युक्तं हि निश्चितं आ संसाराद्भावेन ज्ञानं त्रि-
पुरांतकांघ्रियुगलं मुक्ता अन्या गतिर्नास्ति किं वि· कालः कृतांतः कृतो अंतो येन सः कृतांताः १२
श्लोक तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभिः क्षुधार्त्तः सन् शालीन्कवलयति शाकादि-
बलितान् प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं प्रतीकारो व्याधेः सुखमिव विपर्यस्यति जनः
१३ टीका अथान्यदाह प्राणी सलिलं पानीयं पिबति क सति आस्ये वदने तृषा शुष्यति सति किं-
जनः प्राणी व्याधेः प्रतीकारः उपचारः सुखमिव विपर्यस्यति विपर्ययासं करोति १३ ॥

+गुणाश्च बंध्यफलतां जाताः के विना [illegible]

श्लोक स्नात्वागांगैःपयोभिःशुचिकुसुमफलैरर्चयित्वाविभोत्वां ध्येयध्यानंनिवेश्यक्षितिधरकुहर
ग्रावपर्यंकमूलेआत्मारामःफलाशीगुरुवचनरतःत्वत्प्रसादात्स्मरारे दुःखंमोक्ष्येकदाहंतवचरणर
तौध्यानमार्गैकघस्रैः ९४ टीका अथान्यदाह हेस्मरारेअहंकदादुःखान्मोक्ष्येकिंकृत्वागांगैःपयो
भिःस्नात्वाहेविभोचान्यत् त्वांशुचिःकुसुमफलैअर्चयित्वा पुनःकिंकृत्वाक्षितिधरकुहरग्रावपर्यं
कमूले ध्येयेकर्मणिध्यानंनिवेश्य क्षितिधरस्यकुहरंक्षितिधरकुहरंक्षितिधरकुहरस्ययत् ग्रा
वंतदेवपर्यंकं तस्यमूलंक्षितिधरकुहरग्रावपर्यंकमूलंतस्मिन् स्थितः किं॰ अहंआत्मारामः पुनः
किंवि॰ अहंफलाशी पुनःकिं॰ अहंत्वत्प्रसादात् गुरुवचनरतः पुनःकिं॰ अहंध्यानमार्गैकघस्रैः।
तवचरणरतः ९४ श्लोक शय्याशैलशिलागृहंगिरिगुहावस्त्रंतरूणांत्वचः सारंगाःसुहृदो
ननुक्षितिरुहांवृत्तिःफलैःकोमलैः येषांनैर्झरमंबुपानमुचितंरत्यैचविद्यांगना मन्येतेपरमेश्व
राःशिरसियैर्बद्धोनसेवांजलिः ९५ टीका अथान्यदाह येषांपुरुषाणांएवंविधास्थितिःअ
हंएवंमन्येतेएवपरमेश्वराः साकास्थितिः शैलशिलाशय्यागिरिगुहागृहं तरूणांत्वगेववस्त्रंसु
हृदःसारंगाः ननुनिश्चितं क्षितिरुहांवृक्षाणांकोमलैःवृत्तिःनैर्झरअंबुपानंएवनिश्चयेनरत्या
सहउचितंअंगनाविद्यायेषामितिस्थितिः तेईश्वराःयैःशिरसिसेवांजलिर्निबद्धः ९५॥६॥

श्लोक सत्यामेवत्रिलोकीसरितिहरशिरश्चुंबिनीविच्छटायां सद्वृत्येकल्प्ययंत्यांवरविटपभवैर्वल्कलैः सफलैश्चा कोयंविद्वान्विपत्तिज्वरजनितरुजातीवदुःखासिकानां वक्त्रंविक्ष्येतदुस्थेयदिहनिविभयात्स्वेकुटुंबेनुकंपा १६ टीका अथान्यदाह हि निश्चितंदुस्थेस्वेकुटुंबे अनुकंपारूपानविभयात् यतदोनित्यसंबंधइतिन्यायात् तदाकोयंविद्वान् अतीवदुःखासिकानांनारीणांवक्त्रंविक्ष्येत अपितु नकोपिकथ्याविपत्तिज्वरजनितरुजाविपत्तिरेवज्वरः विपत्तिज्वरः विपत्तिज्वरेणजनितारुक् विपत्तिज्वरजनितरुकृतया किं· कस्यांशस्यांत्रिलोकीसरति गंगायांसत्यामेवं किंवि· सरितिहरशिरश्चुंबिनीविच्छटायांईश्वरेमस्तकस्पर्शिनीविच्छटः कांचित्प्रदेशोयस्याः सःहरशिरश्चुंबिनीविच्छटायांतस्यांहर· पुनः किं त्रिलोकीसरितिसद्वृत्तेसदाचारेकल्प्ययंत्यांप्रेरयंत्यांकैः सफलैः चान्यत् वल्कलैः किं वरविटपभवैः वरवृक्षोद्भवैः १६ श्लोक उद्यानेषुविचित्रभोजनविधिः तीव्रातितीव्रंतपः कौपीनावरणंसुवस्त्रममितंभिक्षाटनंमंडनं आसन्नेमरणंचमंगलसमंयस्यांसमुत्पद्यते तांकाशींपरिहृत्यहंतविबुधैरन्यत्रकीस्थीयते १७ टीका अथान्यदाह तांकाशींपरिहृत्यत्यक्त्वाहंतइतिखेदेविबुधैः किं अन्यत्रस्थीयते अपितुनयत्र्यांउद्यानेषुविचित्रभोजनविधिः चान्यत् तीव्रातितीव्रंतपः चान्यत सुवस्त्रंकौपीनावरणंमंडनं चान्यत यस्यांअमितंभिक्षाटनं चान्यत यस्यांकाश्यांमंगलसमंआसन्नेमरणंसमुत्पद्यते तांकाशींमुक्त्वा अन्यत्रकथंस्थीयते १७ ॥

म

वै॰टी॰
२३
23

श्लोक नायं ते समयो रहस्यमधुना निद्राति नाथो यदि स्थित्वा द्रक्ष्यति कुप्यति प्रभुरिति द्वारेषु येषां
वचः चेतस्तान्नपहाय याहि भवनं देवस्य विश्वेशितुः निर्दौवारिकनिर्दयोक्त्यपरुषं निःसीमशर्मप्र-
दं १८ टीका अथान्यदाह यदि प्रभुः स्वामी येषां वचः द्वारेषु भूत्वा स्थित्वा इति द्रक्ष्यति कुप्यति
इतीति किं नायं ते समयः संप्रति प्रस्तावो नास्ति अधुना रहस्यं मंत्रालोचः नाथः स्वामी निद्राति
प्रमीलां कुरुते रे चेतः तान्त्यक्त्वा नपहाय विश्वेशितुः परमेश्वरस्य महसस्य भवनं याहि किं भवनं।
निर्दौवारिकरिक निर्दयोक्त्यपरुषं कोर्थः निर्गतो दौवारिको यस्मात् तन्निर्दौवारिकं प्रतीहाररः।
हितं निर्दयोक्त्या कठोरोक्त्या अपगतो रूक्षोपो यस्मात् तन्निर्दयोक्त्यापरुषं निर्दौवारिकं च निर्द-
योक्त्यापरुषं च निर्दयोक्त्यपरुषं तत् पुनः किं भवने निःसीमशर्मप्रदं निःसीमं सीमातीतं शर्म
सौख्यं प्रददातीति निःसीमशर्मप्रदं अनर्गलसौख्यदायकमित्यर्थः १८ श्लोक प्रियसखि
विपद्दंडप्रयातपरंपरापरिचयचले चिंताचक्रे निधाय विधिः खलः मृदमिव बलात् पिंडीकृ-
त्य प्रगल्भकुलालवत् भ्रमयति मनो नो जानीमः किमत्र विधास्यति १९ टीका अन्यदाह ॥
हे प्रियसखे खलो विधिः पराङ्मुखो दैवः नो जानीमः अत्र किं विधास्यति अयं विधिः चिंताचक्रे
निधाय बलात्पिंडीकृत्य मनो भ्रमयति किं विशिष्टे चिंताचक्रे विपद्दंडप्रयातपरंपरापरिचयच-
यथा प्रगल्भकुलालः मृदं मृत्तिकां बलात् पिंडीकृत्य चक्रे निधाय भ्रमयति एतावता विपरीतविधेः वि-
लसितं कोपि न वेत्ति १९ ॥

२३

श्लोक रे कंदर्प्प करं कदर्थयसि किं कोदंडटंकारवैः रे रे कोकिल कोमलैः कलिरवैः किं त्वं वृथा जल्पसि मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं चेतश्चुंबितचंद्रचूडचरणध्यानामृतं वर्त्तते १०० टीका अथान्यदाह रे कंदर्प्प कोदंडटंकारवैः करं किं कदर्थयसि रे रे कोकिलः कोमलैः कलिरवैः पंचमस्वरैः किं वृथा जल्पसि हे मुग्धे कटाक्षैरलं पूर्यतां किं वि० कटाक्षैः स्निग्धविदग्धमुग्धमधुरक्षेपैः स्निग्धश्च विदग्धश्च मुग्धमधुरश्च क्षेपो येषां ते स्निग्धविदग्धमुग्धमधुरक्षेपाः तैः स्नि० भवतो पूर्वोक्तानां कृतं निखिलमपि व्यर्थं अस्माकं चेतः चुंबितचंद्रचूडचरणध्यानामृतं (?) वर्त्तते चुंबितचंद्रचूडचरणध्यानामृतम् १०० श्लोक महेश्वरे वा जगतामहेश्वरे जनार्द्दने वा जगदंतरात्मनि न मे भेदहेतुप्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेंदुशेखरे १ टीका अथान्यदाह मे मम महेश्वरे वा अथवा जनार्द्दने वासुदेवे भेदहेतुः प्रतिपत्तिर्नास्ति किं महेश्वरे जगतां महेश्वरे त्रिभुवनस्य अधिपतौ किं वि० जनार्द्दने न जगदंतरात्मनि जगतां विश्वत्रयाणां अंतरात्मा जगदंतरात्मा तस्मिन् जगदुभयोर्देवयोर्मम मध्ये तस्यांतरं नास्ति तथापि तरुणेंदुशेखरे श्रीमहेशे मे मम भक्तिः एवामिथ्यात्विनामुक्तिः १ श्लोक कौपीनं शतखंडजर्जरतरं कंथा पुनस्तादृशी निश्चिंतं सुखसाध्यभैक्ष्यमशनं शय्या श्मशाने वने मित्रामित्रसमानतातिविमलाचिंतार्थशून्यालये ध्वस्ताशेषमदप्रमादमुदितो योगी सुखं तिष्ठति २॥ ॥

येनातं चुंबितचंद्रचूडचरणध्यानामृतं ८

वै·टी·
२४

टीका अथान्यदाह योगी सर्वसंगपरित्यागी सुखं तिष्ठति किं वि॰ योगी ध्वस्ताशेषमदप्रमादमुदितः ध्व
स्ता निराकृताः अशेषाः मदप्रमादा येन ध्वस्ताशेषमदप्रमादस्तेन मुदितः ध्वस्ताशेषमदप्रमात् मु
दितः यस्य योगिनः शतखंडजर्जरतरं कौपीनं पुनः कंथा तादृशी पूर्वोक्ता शतखंडजर्जरतरा निश्चि
तमशनं किं सुखसाध्यं भैक्ष्यं सुखेन साध्यं सुखसाध्यमेवंविधायाः भिक्षायाः समुत्पन्नं भैक्ष्यं
सुखसाध्यं भैक्ष्यं अन्यच्च शय्या श्मशाने वने तथा मित्रामित्रसमानता मित्रश्च अमित्रश्च तौ मि
त्रामित्रौ तयोर्मित्रामित्रयोः सादृश्यमानतं च यस्य यत्र समित्रामित्रसमानता: अथ च ध्यानं शू
न्यालये अतिविमला अतिनिर्मला शुल्क ध्यानलक्षणाः चिंता अतः कारणात् योगी निर्मुक्तः ।
संसारसुखं न तिष्ठति २ श्लोक भोगाभंगुरवृत्तयो बहुविधास्तैरेव चायं भव स्तत्कस्येव कृते प
रिभ्रमत रे लोकाः कृतं चेष्टितैः आशापाशशतोपशांतिविशदं चेतः समाधीयतां कामोच्छित्तिव
शे स्वधामनि यदि श्रद्धेयमस्मद्वचः ३ टीका अथान्याह रे लोकाः चेष्टितैः न व रचि कल्पव्यापारैः
कृतं पर्याप्तं यदि चेत् अस्मद्वचः श्रद्धेयं श्रद्धायोग्यं श्रद्धेयं अनुनयत्य इत्यर्थः तदा स्वधामनि स्वकी
य शरीरमंदिरे कामोच्छित्तिवशे कंदर्पोज्जयार्थे केवलं चेतः समाधीयतां किं वि॰ चेतः आशापाश
शतोपशांतिविशदं आशापाशस्य शतं आशापाशशतं तस्योपशांत्या विषदं निर्मलम् आश॰ यतो भोगी
कस्य कृते परिभ्रमतं वं भ्रमणं कुरुत ३ ॥ ॥ ॥ ॥ ॥ ॥

श्लोक धन्यानां गिरिकंदरे निवसतां ज्योतिः परं ध्यायतामानंदाश्रुजलं पिबंति शकुना निःशंकमंके
शया अस्माकं तु मनोरथैः परिचितं प्रासादवापीतरक्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीय
ते ४ टीका अथान्यदाह धन्यानां मनुष्याणामेवं श्रेष्ठत्वायुः परिक्षीयते किंवि· धन्यानां गिरिकं।
दरे निवसतां धन्यानां किं कुर्वतां परंज्योतिः ध्यायतां येषां धन्यानां मानंदाश्रुजलं निःशंकं शंकार
हितं शकुनाः पक्षिणः पिबंति किंवि· शकुनाः अंके शय्याः उत्संगसमागमारूढाः तु पुनः अस्माकम
धन्यानां मायुरेवं मनोरथैः परिक्षीयते किं· अस्माकं परिचित्तप्रसादवापीतरक्रीडाकाननेकेल
यः तासां कौतुकैः जुषंतीति परिचित्तप्रसादवापीतरक्रीडाकाननकेलिकौतुकजुषस्तेषां परि॥
५ श्लोक आघ्रातं मरणेन जन्मजरया यात्युज्वलं यौवनं संतोषोधनलिप्सया शमसुखं प्रौढां·
गनाविभ्रमैः लोकैर्मत्सरिभिः गुणा वनभुवो व्यालैर्नृपादुर्जनैरस्थैर्येण विभूतिरप्यपहताग
स्तन्नकिं केजनाः ५ टीका अथान्यदाह एभिः प्रकारैः किं न गनस्तं अन्यच्च के जनाः नगनस्ताः।
मरणेन जन्म आघ्रातं स्पष्टभित्यर्थः अत्युज्वलं यौवनं जरया आघ्रातं स्पष्टं धनलिप्सया संतो
षो आघ्रातः प्रौढांगनाविभ्रमैः शमसुखमघ्रातं ग्रस्तं मत्सरिभिर्लोकैः गुणाः आघ्रातैः शिताः विना
व्यालैर्दुष्टगजैर्वनभुवो आघ्रा दुर्जनैर्नृपाः भूपालाः आघ्राता ग्रस्ता विभूतिरपि अस्थैर्येण आघ्रा
ता अपहता इत्यर्थः तर्हि कालेन किं किं न विनंक्ष्यति ५॥

वै॰टी॰
२५
25

श्लोक आधिव्याधिशतैर्वयस्यतितरामारोग्यमुन्मूल्यते लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्या-
पदः जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसात् तत्किं नाम निरंकुशेन विधिना यन्नि-
र्मितं सुस्थितं ॥६॥ टीका अथान्यदाह नामइति संबोधने तत्किं यन्निरंकुशेन विधिना निरंकु-
शेन विधिना दैवेन सुस्थितं निर्मितं किं तत् वयसि शरीरे आधिव्याधिशतैः अतितरामतिश-
येन आरोग्यमुन्मील्यते तत्र आधिर्मानसी पीडा व्याधी रोगसमुद्भवः अन्यत् यस्मिन्नैव भूमीले
लक्ष्मीः पतन्ति पक्षीवत् यत्र नश्यानावर्त्तते व्यापदः विवृतद्वारा इव उद्घाटितकपाटा इव वर्त्तते
अवश्यं निश्चित्तमाशुः शीघ्रं मृत्युर्यमः जातं उत्पन्नं आत्मसात्करोति आत्माधीनं विधत्ते ततः
अस्य दैवस्य निर्माणे किमपि स्थितं नास्तीत्यागमः ॥६॥ श्लोक कृच्छ्रेणामेध्यमध्ये नियमितत-
नुभिः स्थीयते गर्भमध्ये कांताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः नारीणामप्यव-
ज्ञाविलसति नियतं वृद्धभावोप्यसाधुः संसारे रे मनुष्याः वदत यदि सुखं स्वल्पमप्यस्ति किंचित्
॥७॥ टीका अथान्यदाह रे मनुष्याः वदत कथयत यदि चेत् संसारे स्वल्पमपि सुखं किंचिदस्ति ग-
र्भमध्ये कृच्छ्रेण कष्टेन नियमितजनुभिः संकोचितशरीरैः स्थीयते किं गर्भमध्ये अमेध्यमध्ये अ-
मेध्यं मध्ये यस्य मध्यं तस्मिन् अ॰ अस्मिन् संसारे यौवने विप्रयोगः किंवि॰ यौवने कांताविश्लेषदुःखवि-
पि तु पुनः नियतं निश्चितं वृद्धभावः असाधुः अस्मात्कारणात् संसारे किमपि सौख्यं नास्ति ॥७॥

२५

स्यतदमेध्य २

श्लोक आयुर्वर्षशतंनृणांपरिमितंरात्रौतदर्द्धीकृत स्तस्यार्द्धस्यपरस्यचार्द्धपरमंबाल्यत्ववृद्धत्वयो:॥
शेषंव्याधिविशेषदु:खसहितंसेवादिभिर्नीयते जीवेवारितरंगचंचलतरेसौख्यंकुत:प्राणिनां ८
टीका अथान्यदाह प्राणिनांसौख्यं कुत:कथंनृणांमनुष्याणांआयुर्वर्ष शतंपरिमितंतस्यायुषो २
वर्षशतप्रमाणस्यअर्द्धंरात्रौगतं शयानस्यततोनंत रंशेषं [illegible] तस्यअर्द्धस्य पचाशत् अर्द्ध पचाशत्
स्यकदाचिदपि अधिकमर्द्ध मपिबाल्यत्ववृद्धत्वयोगतंशेषमायु: व्याधिवियोगशोकसहितंसेवा
भि दिभि: कर्मभिर्नीयते किंचि· जीविते वारितरंगचंचलतरेवारिण: समुद्रस्यतरंगा: वारितरंगास्त
द्वत् चंचलंतर: वारितरंगचंचलतर: तस्मिन्वारि: ८ श्लोक अभिगतमहामंथिप्रभेदगरीय
सीगुरुतरगुणग्रामांभोजस्फुटोज्वलचंद्रिका विपुलविरलत्कुजावल्लीविदारकुवारिकाजठरपि
जठरीदु:पूरेयंकरोतिविडंबनां ९ टीका अथान्यदाह इयंदु:पूराजठरपिठरीउदरकोष्ठिकाविडंब
नांकरोति प्राणिनांवियोग अथान्येषांटीकानास्ति ९ श्लोक भ्रमत्स्नानविवेकिनोमलधिय:
कुर्वंत्यहोदुष्करं यन्मुंचंत्युपभोगभाज्यपिधनान्येकांतकोनिस्पृहा: नप्राप्तानिपुराणसंप्रति
नचप्राप्तौदृढप्रत्यया वांछापात्रपरिग्रहाण्यपिपरंत्यक्तुंनशक्तावयम् १० व्याघ्रीवतिष्ठतिज
रापरितर्जयंती रोगाश्चशत्रवइवप्रहरंतिदेहं आयु:परिस्रवतिभिन्नघटादिवांभोलोकस्तथा
प्यहितमाचरतीतिचित्रं ११॥

भोगास्तुंगतरंगभंगचपलाः प्राणाः क्षणध्वंसिनः स्तोकान्येवदिनानियौवनसुखंप्रितिःप्रि
येष्वस्थिरा तत्संसारमसारमेवनिखिलंबुध्वाबुधाबोधये लोकानुग्रहपेशलेनमनसायत्नः
समाधीयतां १२ सृजतितावदशेषगुणाकरंपुरुषरत्नमलंकरणंभुवः तदनुतत्क्षणभंगि
करोतिचेदहहकष्टमःपंडितताविधेः १३ जातःकूर्मःसएकःपृथुभुवनभरायार्पितंयेनपृष्ठं
श्लाघ्यंजन्मध्रुवस्यभ्रमतिनियमितंयत्रतेजस्विचक्रं संजातव्यर्थपक्षाःपरिहितकरणेनो
परिष्टान्नचाधो ब्रह्मांडोडंबरांतर्मशकवदपरेजंतवोजातनष्टाः १४ क्षणंबालोभूत्वाक्षण
मपियुवाकामरसिकः क्षणंवित्तैर्हीनःक्षणमपिचसंपूर्णविभवः जराजीर्णैरंगैर्नटइवब
लीमंडिततनुः नरःसंसारेकेविशतियमधानीयवनिका १५ पातालान्नसमुद्धृतोवतब
लिर्मृत्युर्नैनीतःक्षयं नोन्मृष्टंशशिलांछनस्यमलिनंनोन्मूलिताव्याधयः शेषस्यापिधरां
विभ्रतःनकृतोभारावतारःक्षणं पुरुषनागरूपाभिमानगलनांमिथ्यावहद्धिग्यसे १६॥
प्रशांतशास्त्रार्थविचारचापलंनिवृत्तनानारसकाव्यकौतुकं निरस्तविशेषविकल्पविप्ल
वंप्रपत्तुमन्विच्छतिशंकरंमनः १७ आघ्रायपुस्तकंधन्याःसर्वेविमइतिस्थिताः शांतरू
लोपमंएवंतिहानविज्ञोजडावयं १८ धिक्कोजीवितमापदेयनिलयंपित्राप्तवंधूभिर्जि

तं दीनानाथंजनोपकारकरणव्यापारदूरीकृतं मंदीभूतत्राशांकत्रोषरपदद्वंद्वारविंदस्मृतिः। व्यालोलायतलोचनास्तनतटप्रश्लेषविश्लेषितं १९ भोगेरोगभयंसुखेक्षयभयंवित्तेषु राज्ञोभयं दासेस्वामिभयंजयेरिपुभयंवंशेकुयोषिद्भयं मानेम्लानिभयंगुणेखलुभयंदेहेकृतांताद्भयं सर्वेनामभयंभयंभयमहोवैराग्यमेवाभयं २० इतिश्रीभर्तृरीरहस्येतृतीयखंडस्यटीकायांवैराग्यशतकंसंपूर्णं शु भंभवतु श्रीरस्तु श्रीकृष्णार्पणमस्तु नारायण

यादृशंपुस्तंदृष्टानादृशंलिखितंमया यदिशुद्धमशुद्धंवाममदोषोनदीयते १ नारायणहरी

श्रीविक्रमादित्यसंवत्सरे १९८ ९२ श्रावणमासेशुक्लपक्षेतीथौपौर्णमास्यांशनिवारेशुभस्थानेपुरमंडलमध्येउमापतिसमीपेदेवकातटेलिखितंजवाहिरगिरस्यपुस्तकं पठनार्थंराम॥